॥ ओ३म् ॥

सर्वौषधीनाममृता प्रधाना
सर्वेषु सौख्येष्वशनं प्रधानम्।
सर्वेन्द्रियाणां नयनं प्रधानं सर्वेषु
गात्रेषु शिरः प्रधानम्॥

( चाणक्य-नीति )

RNI No. : DELSAN/2011/38660 ISSN 2321 - 4937

सत्यनिष्ठा जयेल्लेखनी निर्भया

# संस्कृत – संवादः

पाक्षिकं समाचारपत्रम्

संपादकीयकार्यालयः ए-२/३२, वजीराबाद मार्गः, भजनपुरा, देहली-११००५३, दूरभाषः ९३१११०८६७५१
ई-मेलः sanskritsamvad@gmail.com वेबसाइट.: www.sanskritsamvad.com मूल्यम्-रू. ५/-

॥ ओ३म् ॥

विद्यार्थी सेवकः पान्थ
क्षुधाऽऽर्तो भयकातरः।
भाण्डारी प्रतिहारी च सप्त
सुप्तान् प्रबोधयेत्।

( चाणक्य-नीति )

卐 वर्षम्-८ 卐 अंकः-३ ( १६९ ) 卐 १ अगस्तः २०१८ तः १५ अगस्तमासः २०१८ पर्यन्तम् 卐 विक्रमसंवत्-२०७५ 卐 सृष्टिसंवत्-१,९६,०८,५३,११६ 卐 पृष्ठम्-८

## संस्कृतसाहित्ये उत्कृष्टयोगदानाय साहित्यकाराणां सम्मानः

नवदेहली। दिल्ली संस्कृत अकादमी माध्यमेन देशे संस्कृत साहित्ये उत्कृष्ट योगदानाय पञ्च साहित्यिकारान् सम्मानितं कृतवान्। दिल्लीसचिवालयस्य सभागारे आयोजित "संस्कृत सेवा सम्मान" समारोहे गया बिहारतः प्रो. दलवीरसिंह चौहान, दिल्लीतः प्रो. रमेशकुमारपाण्डेय, एवं प्रो. शशिवाला,




महाराष्ट्रतः डॉ. प्रसादशरदकुलकर्णी एवं उड़ीसातः प्रो. सदानन्ददीक्षितं तान् संस्कृतभाषायाः विकास एवं प्रचार-प्रसाराय कृत उत्कृष्ट योगदानाय सम्मानितं कृतवान्। अस्मिन्नवसरे उपमुख्यमंत्री मनीषासिसौदिया उक्तवान यत् आदिकालतः वयं संस्कृतभाषायाः ज्ञानेन समृद्धशालि अस्मः कला,

शेषभागःद्वितीयपुटे

## हैदराबाद-नगरे 'द्वि-दिवसीय-संस्कृत-कार्यशाला' सुसम्पन्ना

हैदराबाद्। पुदुच्चेरीस्थस्य श्री-अरविन्द-भारतीयसंस्कृति-संस्थानस्य पक्षतः 'द्वि-दिवसीय-संस्कृत-कार्यशाला (स्तरः – I)' हैदराबाद् नगरस्य प्रसिद्धेन भाषावैज्ञानिकेन डॉ. वाई.एन्. राव्-महोदयेन 2018-वर्षस्य जुलै-मासस्य एकविंशति-द्वाविंशतितम-दिनाङ्कयोः 'श्री-अरविन्द-सोसाइटी' इति संस्थायाः हैदराबाद-शाखायाः 'श्री-अरविन्द-भवन'-परिसरे मुशीराबाद्-समीपे, हैदराबाद् नगरे (तेलङ्गाणा राज्ये, भारते) सुसम्पन्ना।



कार्यशालायां तेलङ्गाणा राज्यस्य हैदराबाद/सिकन्दराबाद्- नगरद्वय जगित्याल् च-नवदेहली-गुरुग्रामम्-महाराष्ट्र राज्यस्य नागपुर्कर्णाटक राज्यस्य बेङ्गलूरु-आन्ध्र प्रदेश राज्यस्य विशाखपट्टणम् काकिनाडा विजयवाडा-विदेशस्य दुबाई (यू.ए.ई.) च-नगरेभ्यः pxazt !-प्रतिभागिनः (पुरुषाः महिलाः बालाश्च) भागं गृहीतवन्तः।

एतस्याः कार्यशालायाः दिनद्वयस्य पाठ्यक्रमे 'देवनागरी लिपिः' इति विषयसम्बन्धी उच्चारणसहितः सिद्धान्तः अभ्यासः इत्यादीनि वैज्ञानिकदृष्टिकोण-द्वारा पाठितानि। केषाञ्चन चितानां श्लोकानां मन्त्राणां

शेषभागःअष्टमपुटे

## नृत्यमहोत्सवे संस्कृतगीताश्रिता नृत्यप्रस्तुतिः

नवदेहली। इंडिया-इंटरनेशनलसेंटर, नवदेहली इत्यत्र 25-27.07.2018 तारिकासु 'मानस-आर्ट-विदाउट-फ्रंटियर्स' इत्यनया संस्थया समायोजिते नृत्यसमारोहे श्रीमत्या कमलिनीदत्तया शेरोनलोवेनमहोदयया च निर्दिष्टानां नैकेषां नृत्यानां रम्याः प्रस्तुतयः संजाताः।





श्रीमत्या कात्यायनिगुप्ताः



श्रीमत्या पूर्वाधनाश्रीः

अस्मिन्नवसरे डॉ. रमाकान्तशुक्लेन विरचितं 'क्रूरहृदय मेघ स्वागतं पयोद ते' इति कविताद्वयमाश्रित्य कात्यायनीगुप्तया भरतनाट्यशैल्यां नृत्यं प्रस्तुतम्। पद्मश्री सम्मानालङ्कृतेन रमाकान्तशुक्लेन दीपप्रज्वलनं कलाकाराणां सम्माननं च कृतम्।

शेषभागःअष्टमपुटे

## महाकविः गीतकारः गोपालदासः "नीरज" स्मृतिशेषः

नवदेहली। प्रसिद्ध कवि एवं गीतकार गोपालदास "नीरजः" नवदेहली स्थित एम्स अस्पताले दिवंगतो जातः। श्वास क्रियायां समस्यायाः कारणेन तेषां मृत्यु अभवत्। इतः पूर्वं ते आगरा स्थित लोटस अस्पताले आसन् परञ्च तत्र स्वास्थ्ये परिवर्तनं नाभवत् अतः एम्स आगतवान। तेषां अन्तिम संस्कारः 21 जुलाई 2018 अलीगढ़े अभवत्। इटावा नगरे तेषां जन्म अभवत्। तं बहु सम्मानमपि प्राप्तवान। 2007 तमे वर्षे पद्मभूषण सम्मानेन सम्मानितो जातः। उत्तरप्रदेश सर्वकारः तं यशभारती सम्मानं दत्तवान। चलचित्राय अपि गोपालदासः बहु प्रसिद्ध गीतस्य रचना अकरोत् तस्मै तं फिल्म फेयर अवार्ड अपि प्राप्तवान।



**प्रथमपुटस्य शेषभागः**

## संस्कृतसाहित्ये उत्कृष्ट योगदानाय....

संस्कृति एवं भाषा अस्माकं परियायकोऽस्ति। अस्मान् पाश्चात्य संस्कृति स्वीकृत्व अस्माकं संस्कृतिं न विस्मृतव्यम्। दिल्ली









सर्वकारस्य कला, संस्कृति एवं भाषा सचिव सिक्कु दुग्गा उक्तवान यत् सम्मानित साहित्यकाराणां स्वागतं कृत्वा उक्तवान यत् भावपूर्ण अयं सम्मानं गृहीत्वा दिल्ली सर्वकार एवं संस्कृतअकादम्याः मानं वर्धयिष्यन्ति।

अस्मिन्नवसरे कार्यक्रमे आगत समागत सर्वे विद्द्जनानां एवं संस्कृत प्रेमीनां धन्यवादं कृत्वा दिल्लीसंस्कृतअकादम्या उपाध्यक्षा डॉ. कान्ताभाटिया उक्तवती यत् अद्य सम्मानित सर्वे विद्वान्स न केवलं देशस्य अपितु सम्पूर्ण विश्वस्य संस्कृति एवं सभ्यतायाः चिन्तनं कृतवन्तः एवं मार्गदर्शनमपि कृतवन्तः। संस्कृतस्य मौलिकता अद्यापि सुरक्षितोऽस्ति।

## महानक्रान्तिकारि-चन्द्रशेखरआजादस्य जीवनोपरि संस्कृते चलचित्रस्य निर्माणं भविष्यति



मुम्बई। महानक्रान्तिकारी अमरशहीद चन्द्रशेखरआजादस्य जीवनोपरि बहुभाषा चलचित्र राष्ट्रपूत्रस्य निर्माणं अभवत्। अस्य एकं संस्करणं संस्कृत भाषायां भविष्यति। आजादस्य जन्मतिथिं 23 जूलाई मुम्बई नगरे अस्य चलचित्रस्य प्रथम प्रदर्शनं भविष्यति। इदं चलचित्रं मूलरूपेण हिन्दी भाषायामस्ति। अस्यानन्तरं इदं चलचित्रं 25 (पञ्चविंशति) भाषायां निर्माणस्य कार्य प्रचलति। संस्कृत भाषायां अस्य चलचित्रस्य संस्करणं सर्वप्रमुखं मन्यते। यद्यपि इदानीं पर्यन्तं संस्कृते केवलं षड् (6) चलचित्रस्य निर्माणमभवत्। चलचित्रस्य निर्देशकस्य कथनमस्ति यत् अस्मिन् चलचित्रे आजादस्य जीवनस्य विभिन्न क्षेत्रान् प्रदर्शयति। हिन्दी संस्कृतस्यातिरिक्त इदं चलचित्रे दक्षिणभारतीय भाषायां, बंगाली, भोजपुरी, पंजाबी, असमिया, गुजराती एवं बुन्देलखण्डी भाषायामपि भविष्यति।

# प्रयाग-कुंभ-माध्यमेन विश्वे सार्थक-संदेशः गमिष्यति-अमितशाहः

इलाहाबाद। आगामि वर्षस्य जनवरी मासतः आरभ्यमान प्रयागकुंभ भव्यता प्रदानाय उ.प्र. एवं केन्द्रसर्वकारः प्रयत्नशीलोऽस्ति। इत्यं ध्याने धृत्वा भाजपा अध्यक्ष अमितशाह




प्रयागं गत्वा साधुजनेन सह वार्तालापं कृतवान। अस्मिन्नवसरे ते उक्तवन्तः यत् प्रयागकुम्भ एवं संत माध्यमेन विश्वं एकः सार्थक सन्देशः मिलिष्यति। अनया संसारः सनातन संस्कृते सम्बद्धो भविष्यति। ते उक्तवन्तः यत् अत्रतः पूर्वं संगमक्षेत्रे 5 कि.मी. पार्यन्त घाटस्य निर्माणं भविष्यति। इतः पूर्वं ते यमुनाबैंक मार्ग स्थित गौरी गिरि मन्दिरं गतवन्तः। तत्र सिद्धबाबा मौणगिरि घाटस्य उद्घाटनं कृतवन्तः। अस्यानन्तरं योगध्यान केन्द्रस्य शिलान्यासः कृतवान। अनन्तरं बाँध स्थित हनुमान मन्दिरं गतवान। एवं संगम तटे गत्वा पूजा अर्चना कृतवन्तः। अस्मिन्नवसरे अखाड़ा परिषदस्य अध्यक्ष महंत नरेन्द्र गिरि, महामंत्रि हरिगिरि, उपमुख्यमंत्री केशवप्रसादमौर्य, भाजपा प्रदेश अध्यक्ष डॉ. महेन्द्रनाथपाण्डेय उपस्थिताः आसन्।

# वैज्ञानिकमाध्यमेन निर्मितं श्रीमद्भगवद्गीताया ऑडियो एलबमं व्यक्तित्वविकासे उपयोगि भविष्यति

नवदेहली। मध्यप्रदेशस्य भोपाल स्थित निजिकार्या प्रतिष्ठाने कार्यरत वरिष्ठ महाप्रबन्धकस्य पदे कार्यरत 55 वर्षीय डॉ. डी. मुरलीकृष्णः श्रीमद्भागवत गीतायाः महत्वस्य विषये ज्ञानाय अयं ओडियो निर्मितवान। दिल्ली स्थित आन्ध्रभवने आयोजित कार्यक्रमे डॉ. मुरलीकृष्णः उक्तवान यत् अयं ओडियो एलबम दुःखं एवं अवसादं निस्सारयितुं एवं जीवने सुख शान्ति प्राप्तकरणाय अस्ति। एषु श्रीमद्भागवत गीतायाः प्रमुख 108 श्लोकेऽस्ति। यो प्रेरणा, आत्मनियंत्रणम्, व्यवहार, नेतृत्व, चरित्र निर्माण, आध्यात्मिक एवं कर्तव्योपरि आधारितोऽस्ति। एतेषां श्लोकानां मर्म अवगत्य प्रबन्धन सिद्धान्त एवं आध्यात्मिकतायाः अवधारणया साक्षात्कारः कर्तुं शक्यते। अयं एलबम व्यक्तित्व विकासस्य दृष्ट्या युवकानां कृते उपयोगी वर्तते।

डॉ. मुरलीकृष्णः उक्तवान यत् एषु तेषां माध्यमेन उच्चारित श्लोकाः शास्त्रीय संगीतोपरि आधारितोऽस्ति। यं हिन्दी एवं तेलगु भाषायां निर्मितवान। अयं तेषां माध्यमेन श्रीमद्भागवत्गीतायाः सारं आमजन पर्यन्तं प्रसारणस्य प्रयासोऽस्ति।

## संस्कृतसङ्गोष्ठी

वार्ताहरः रामदेवः

दिनांक 25/07/2018 सिरसास्थ चौधरी देवीलाल विश्वविद्यालयस्य मानविकी संकाय अंतर्गत संस्कृतविभागे संगोष्ठी



सम्पन्ना तत्र संकायाध्यक्षा प्रो दीप्ति धर्मानी अध्यक्षत्वेन दायित्वं स्वीकृत्य गोष्ठीं सनाथीकृतवती। मुख्यातिथिरूपेण डॉ श्रेयांश द्विवेदी उपाध्यक्ष हरियाणा संस्कृत अकादमी पञ्चकूला दायित्वं निर्व्यूढवान्। गोष्ठ्याः संयोजनं रमनदीपः रामदेवौ च कृतवान्तौ। गोष्ठ्यां संस्कृतस्य राज्ये सर्वस्मिन् संस्थानेषु संस्कृतस्य अध्ययनं संस्कृतमाध्यमेन भवेदिति वातावरणनिर्माणाय अस्माभिःप्रयतनीयम् इति विशेषरूपेण चर्चा सञ्जाता। अस्मिन्नवसरे डॉ तेजारामः, प्राचार्यः, राजकीय महिला महाविद्यालय सिरसा, प्रो. पंकजः आचार्यः आंग्ल विभागः चौधरी देवीलाल विश्वविद्यालयः, श्रीमान् हरिओम जी सदस्य हरियाणा संस्कृत अकादमी प्रभृतिभिः सह विभिन्नेषु विषयेषु परिचर्चा सञ्जाता।

## फरीदाबादनगरे संस्कृतसङ्गोष्ठी

वार्ताहरः विकासः फरीदाबाद हरियाणा

अद्य श्रावणकृष्ण द्वितीयायां संवत् 2075 रविवासरे सैक्टर 11



फरीदाबादनगरे गोष्ठी सम्पन्ना अस्यां गोष्ठ्याः मुख्यं लक्ष्यमासीत् परिवारेषु संस्कृताभिरुचिः। अस्याः गोष्ठ्याः संयोजनं श्री विकासः कृतवान्। तत्र प्रायः सामान्याः जनाः समुपस्थिताः। मुख्यं समुद्बोधनं डॉ श्रेयांश द्विवेदी उपाध्यक्ष हरियाणा संस्कृत अकादमी पञ्चकूला महोदयानाम् अभवत्। द्विवेदी महोदयःतेषां पुरतः संस्कृतस्य वैज्ञानिकं तत्त्वं प्रस्तुतवान्। तेनोक्तं संस्कृतज्ञानेन जीवनं सुखमयं भवति। सुसंस्काराः स्वयमेव समागच्छन्ति। परिवारेषु सुखं शान्तिं च निश्चयेन आगच्छतः। अतः सर्वैरेव विद्यालयं गत्वा आत्मनःपुत्र्यै/ पुत्राय पौत्र्यै/पौत्राय आरम्भ एव संस्कृतविषयःचेतव्यः। अन्ते सर्वेषां धन्यवादज्ञापनं कृतम्।

# वासुदेवदण्डकम्

–डॉ अरविन्दकुमारतिवारी
arvindt490@gmail.com

(इदं काश्याः प्रथितविदुषः श्रीमतः सार्वभौमसंस्कृतप्रचारसंस्थानस्य संस्थापकवर्यस्य आचार्यवासुदेवद्विवेदिशास्त्रिगुरुवरस्य कृतज्ञशिष्येण विरचितं सहृदयहृदयहरणं कुर्यादिति कामये।)

सद्गुरवे श्रीगुरुवरवासुदेवद्विवेदिशास्त्रिणे नमः।
गुञ्जेत् सदा संस्कृतरम्यवाणी
वीथ्यां वने मङ्गलभव्यपाणिः।
सर्वत्र वन्द्या प्रसरेद् विचिन्त्य
ययौ गुरुर्मे भुवि वासुदेवः।।
धातुरूपं करे यस्य शब्दरूपं मुखे सदा।
वाक्यसंग्रहपाणिं तं वासुदेवं नमाम्यहम्।।

जयतु जयतु भाष्यतां भारतीयैर्हृदा देववाणी शुभा भारती सौख्यदा हारिणी।
विलसतु भुवि सर्ववेदात्मिका सर्वविज्ञानदा भुक्तिमुक्तिप्रदा सिद्धिदाकांक्षिणी।
विहरतु हृदि नाट्यगीतोक्तियोगादिविद्यालया भूतिदा मोददा मानसोल्लासिनी।
प्रसरतु दिशि कामये रक्ष्यतां वासुदेवोक्तिभिः सर्वजिह्वांगता सा शुभोद्भाविनी। 1
विचरतु मयि जीवनं चार्पितं येन विद्वन्मणीन्द्रादिसेव्येन सर्वं सता भास्वता।
नमत सपदि सादरं तं गुरुं पुष्पगुच्छैः समोदं द्विवेदं श्रुतं शाश्वतं कोविदम् ।
विबुधसुजनवन्द्यमानं बुधं वासुदेवं जगद्भास्करं काशिकं क्रान्तदर्शीश्वरम्।
निखिलवटुकसेवनीयं शिवं शिष्यचित्ताश्रयं यष्टिपाणिं मुदालौकिकं वन्दितम्। 2
धवलनवलधौतवस्त्रं कटौ श्रीशरीरे नवं कंचुकं निर्मलं यस्य तं नौम्यहम्।
प्रणतमनुजजीवनं तद् हृदाकारि लोके मनोहारि तं सद्गुरुं देवतुल्यं नुमः।
विततभुवनकीर्तितं तं कष्पालुं गुरुं प्राप्य मूढोऽरविन्दो गतो विश्रुतिं श्रूयते।
कुसुमनिकरवर्षणैः श्रीगुरुं वासुदेवं सदा सेव्यपादं श्रये शिष्यकः प्रांजलिः। 3
सरतु सरतु सार्वभौमें श्रुतं सार्वभौमं लसत्संस्कृतज्ञास्पदं सुस्थलं पावनम्।
जनबुधमुनितीर्थभूतं शुभं संस्मरामो वयं साम्प्रतं हे बुधाः पुण्यदं सर्वदम्।
हृदि हृदि ननु काशतां विश्रुतं गीस्स्वरैर्वेदमन्त्राक्षरैर्मोहकं वित्तदं शान्तिदं
विबुधसदसि भावये सद्गुरोः कीतिरूपं विशालं गष्हं तत्स्थलं सार्वभौमं ध्रुवम्। 4

अमरवाणी विजयताम्।

# राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः
(भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयाधीनम्,
गुणवत्ताप्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितम्)
56-57, संस्थागतक्षेत्रम्, जनकपुरी, नवदेहली -110 058

## विशिष्टसंस्कृतसेवाव्रतीसम्मानप्रदानाय नामनिर्देशनार्थं आमन्त्रणसूचना

राष्ट्रियसंस्कृतसंस्थानेन प्रतिवर्षं "**विशिष्टसंस्कृतसेवाव्रतीसम्मानः**" तादृशविद्वद्भ्यः प्रदीयते ये संस्कृतक्षेत्रेतराः भूत्वापि पारम्परिकशास्त्राणां गभीरानुशीलनेन शोधमौलिकसाहित्यसर्जनेन तथा संस्कृतसम्बद्धकलानैपुण्येन च पारम्परिकशास्त्रेषु संस्कृतानुसन्धानाध्ययनक्षेत्रेजु महत्त्वपूर्णं योगदानं विदधनाः संस्कृताय दत्तजीवनाः वेविद्यन्ते।

प्रतिवर्षं संस्कृतसप्ताहोत्सवस्य मुख्यसमारोहे (श्रावणीपूर्णिमायाम्) अधिकाधिकं त्रिभ्यः विद्वद्भ्यः पष्टथक्-पृथक् प्रशस्तिपत्रेण सह एकलक्षपरिमितधनराशिः सेवाव्रतीसम्मानरूपेण प्रदीयते। अस्मिन् वर्षे संस्कृतसप्ताहोत्सवः 24 तः 29 अगस्त, 2018 पर्यन्तम् आयोजयिष्यते। तदर्थं भारतदेशस्य सर्वेषां विश्वविद्यालयानां कुलपतयः तथा संस्कृतविभागप्रमुखाः प्रार्थ्यन्ते यत् संस्कृतक्षेत्रेतराः भूत्वा अपि संस्कृतार्थं विशिष्टं योगदानं विदधानानां विदुषां नामानि तेषां पूर्णविवरणेन (सप्रमाणम्) सह 06.08.2018 (5.00 वादनं) पर्यन्तं संस्थानं प्रति पोस्टल द्वारा अथवा निम्नलिखितं ई-मेल संकेतं प्रति प्रेषयितुं शक्नुवन्ति-

**Email:-** rskspvc@yahoo.com

06 जुलाई, 2018 दिनाङ्कात् पश्चात् प्राप्तानि नामानि सेवाव्रतीसम्मानार्थं नैव परिगण्येरन्।

**-कुलसचिवः**

# न हातुं समीहे

- डा. संजयकुमारचौबे

अहं भैक्षवृत्तिं न हातुं समीहे
सुधांशं परेभ्यो न दातुं समीहे।

वसन् रम्यहर्म्ये त्वहं कोमलाङ्गो
रवेस्तीक्ष्णतापे न यातुं समीहे।

कृतं क्रन्दनं पूर्वजैर्मे प्रभूतं
व्रजन् तत्सरण्यां न गातुं समीहे।

परागप्रियो भूरि जातोऽस्मि लोके
गलन्निम्बसारं न पातुं समीहे।

सदालोचनामुद्यतोऽस्मीह कर्तुं
परं स्वस्य वीर्यं न मातुं समीहे।

अविश्रान्तमर्चे स्वदेवं हि भीमं
परं तत्सुमन्त्रं न पातुं समीहे।

## नीतिपञ्चकम्

पूज्यन्ते मतसंग्रहाय मुहिरा लोकेऽधुना भूयसा
त्यज्यन्ते ननु दूरतश्च सुजना दक्षा न ये कैतवे।
मात्रं त्यागवचो ध्रुवं सुललितं संभाषणे श्रुयते
धीमद्भिर्विहितं च कर्म निखिलं मूढैर्वृथा लक्ष्यते।।1।।

आदित्यस्य किलोदयं न सहते ध्वान्तप्रियाणां मनः
पश्यन्मेचकवर्णमेव नयनं नो केशराभं पुनः।
शृण्वच्छ्रोत्रयुगं च दर्दुरवचो नो केसरीगर्जनं
क्षिप्रं भूरि नतोद्यतं जनशिरो नो मानयुक्तां गिरम्।।2।।

चाण्डलस्य शवागमे त्वविरतं भित्तौ शुनो मेहने
ध्वाङ्क्षस्यामिषभक्षणे कुवणिजो भूयः कुसीदार्जने।
आखेटे नृपतेश्च यत्सुखमहो संजायते सर्वदा
मन्ये तत्खलु वञ्चकस्य नियतं लोके नृणां वञ्चने।।3।।

स्फारैः फेरुरवैर्न सिंहतनयो भीतः क्वचिज्जायते
सर्पाणां न च भक्षणेन नितरां वायोर्बलं क्षीयते।
गङ्गाया विमलं जलं न शफरीप्लावैः पुनर्दूषितं
क्ष्माचेतो नहि मूषकादिरचितै रन्ध्रैर्दृढं कम्पते।।4।।

अव्यर्थं ह्यसकृच्च चाटुवचनं पादोत्पलस्पर्शनं
निन्दारम्यरसामृतं जडमतं दोषेक्षणं केवलम्।
व्यर्थं सौम्यवचः सखे गुणवतां भद्रं मनस्त्यागिनां
सत्तानीतिवशात् सदा कलियुगे प्रज्ञाधनं धीमताम्।।5।।

## गलज्जलिका

डॉ. राजेन्द्रत्रिपाठी रसराजः( इलाहाबादतः)

अधरामृतं पीत्वा प्रीतिं मे मनसि वर्धय।
नयनाम्बुजं दृष्ट्वा मैत्रीं मे मनसि दर्शय।1।

गगनेऽपिविना चन्द्रं तारा नहि शोभन्ते।
मुखमण्डलं स्पृष्ट्वा हस्तं मे शिरस्यर्पय।2।

कुसुमं ललितं लब्ध्वा मुदितो मधुपो रमयति।
गायं गायं मधुरं सरसं गीतं गुञ्जय।3।

निकटेऽपि निवसतापि क्रौञ्चः क्रौञ्च्यै क्रन्दति।।
अभिशप्तप्रणयपाशं दूरीकर्तुं मुञ्चय।।
दूरे दूरे भूत्वा  दुर्लभं दर्शनं वै।
पार्श्वमागत्य प्रिये! स्वगतं प्रणयं जल्पय।4।

शून्यं दृष्ट्वा गेहं लभते न रहसि सौख्यम्।
सार्धेन मया वसितुं संश्रित्य सपदि रञ्जय।5।

दर्शं दर्शं फलके श्रावं श्रावं यन्त्रे।
मैत्रीं स्वीकृत्य सखे! चित्रैः सह त्वं सज्जय।6।

सम्भूय सम्मुखं मे सन्तापं शमयित्वा
मन्दं मन्दमागत्य सस्नेहमालिङ्गय।7।

रागानुरागिणी त्वं राधा रसिकस्य प्रिया।
रसराजं वीक्ष्य प्रिये मधुराभक्त्या ह्लादय।8।

# सम्पादकीयम्

सुरभारतीसमाराधकाः!

सादरं नमोनमः।

संस्कृतसंवादपाक्षिकपत्रस्य पाठकान् प्रणम्य भवतः समोदं वच्मि यत् संस्कष्तस्य दिवसा आगताः। जानन्ति भवन्तो यत् संस्कृतं विक्रमकाले भोजकाले शिखरमारूढमासीत्। गुप्तकाले तु संस्कष्तमेव भाष्यते स्मेति श्रूयते। किन्तु गतेषु दशकेषु शतकेषु वा विभिन्नाः भाषाः भारतभुवं चुम्बितुमागताः, भारतीयैरालिङ्गिताश्चापि पीवरायमानास्ताः संस्कृतमेव वक्रदृष्ट्या प्रेक्षन्ते। हन्त! नास्मभ्यं रोचते। वयं सुरभारतीसंरक्षणतत्पराः संस्कृतसेवनाय बद्धपरिकराः अहर्निशं यतामहे। यत् नैव कदापि वैदेशिकी भाषा काचिदपि संस्कृतं तर्जयेत्। वदन्ति अज्ञाः अभिमानिनो यत् संस्कष्तसाहित्यं पण्डितानां पौरोहित्यकर्मदक्षाणामेव भाषा वर्तते।

मित्राणि! सम्प्रति इयं किंवदन्ती अशिष्टानां वाग्विजष्म्भणमात्रं मन्तव्यम्। फलति विश्वफलके संस्कष्तमिति को नो जानाति। चिन्तिताः केचित् यत्संस्कष्ते वृत्त्यभावो वर्तते। अहं पृच्छामि कुत्राभावो वर्तते? किं प्रतिवर्षं संस्कृतज्ञा न नियुज्यन्ते सेवाकर्मसु? किं च अन्यासु भाषासु ये रमन्ते ते किं क्षणमात्रेणैव वृत्तिमुपालमन्ते? किम् आङ्ग्लभाषाविदो विज्ञानविदो वा सेवाकार्ये सद्यएव नियुक्तिं लभन्ते? नैतत् कदापि नैतत्। यः संस्कृतं वा हिन्दीं वा आंग्लभाषां वा विज्ञानं वा गणितं ज्यौतिषं वा आभियान्त्रिकीं विद्यां जानाति तस्य कृते कार्यं सर्वत्र वर्तत एवेति ।

अतः परामष्शामि संस्कष्ताध्येतृन् यद् विहाय संकोचं संस्कृताध्ययने निरता भवन्तु भवन्तः यतोहि भाविकालः संस्कृतस्याभ्युदयं सूचयति। पुनः संस्कृतगंगा भारतीयास्मान् पावयिष्यति। राजनेतारः संस्कृतसंस्थानसंचालकाः,संस्कृतानुरागिणो भवन्तः, अनुदिनं संस्कष्तविकासाय प्रयत्नं कुर्वन्तु इति साग्रहमहं कामये। अन्यदपि निवेदयामि यत् संस्कृतक्षेत्रे विदुषां दृष्टिः कृतभूरिपरिश्रमाणां कृते स्निग्धा भूयाद् येन योग्याः समुचितं पदं यथासमयं लभन्तामिति सम्प्रोच्य स्वलेखनीं संस्थापयामि।

अमरवाणी विजयताम्।

## वेदामृतम्

(ऋग्वेदभाष्यम्)

(प्रथमाष्टकः प्रथमोऽध्यायः तृतीयोऽनुवाकः)

**यो अग्नि देववीतये हविष्म अविवासति।**

**तस्मै पावक मृळय॥९॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। जो मनुष्य अपने सत्यभाव, कर्म और विज्ञान से परमेश्वर का सेवन करते हैं, वे दिव्यगुण, पवित्र कर्म और उत्तम-उत्तम सुखों को प्राप्त होते हैं। तथा जिससे यह दिव्यगुणों का प्रकाश करनेवाला अग्नि रचा है, उस अग्नि से मनुष्यों को उत्तमद्य उत्तम उपकार लेने चाहिएँ इस प्रकार ईश्वर का उपदेश है।।९।।

**स नः पावक दीदिवोऽग्ने देवाँ इहा वह।**

**उप यज्ञं विश्व नः ॥१०॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। जिस प्राणी को किसी पदार्थ की इच्छा उत्पन्न हो, वह अपनी काम सिद्धि के लिए परमेश्वर की प्रार्थना और पुरुषार्थ करे। जैसे इस वेद में जगदीश्वर के गुण, स्वभाव तथा अन्यों में प्रतिपादित किये हुए दृष्टिगोचर होते हैं, वैसे मनुष्यों को उनके अनुकल कर्म के अनुष्ठान से अग्नि आदि पदार्थों को गुणों को ग्रहण करके अनेक प्रकार व्यवहार की सिद्धि करनी चाहिए ॥१०॥

**स नः स्तवान आ भर गायत्रेण नवीयसा।**

**रयिं वीरवतीमिषम् ॥११॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। तथा पहले मन्त्र से श्चकारश की अनुवृत्ति की है। हरएक मनुष्य को वेद आदि के नवीन-नवीन अध्ययन से वेद की उच्चारण क्रिया प्राप्त होती है, इस कारण 'नवीयसा' इस पाद का उच्चारण किया है। जिन धर्मात्मा मनुष्यों ने यथावत् शब्दार्थपूर्वक वेद के पढ़ने और वेदोक्त कर्मों के अनुष्ठान से जगदीश्वर को प्रसन्न किया है, उन मनुष्यों को वह उत्तम-उत्तम विद्या आदि धन तथा शूरता आदि गुणों को उत्पन्न करनेवाली श्रेष्ठ कामना को देता है, क्योंकि जो वेद के पढ़ने और परमेश्वर के सेवन से युक्त मनुष्य हैं, वे अनेक सुखों का प्रकाश करते हैं ॥११॥

**अग्ने शुक्रेण शोचिषा विश्वाभिर्देवहूतिभिः।**

**इमं स्तोमध जुषस्व नः ॥१२॥**

अर्थ-इस मन्त्र में श्लेषालङ्कार है। दिव्य विद्याओं के प्रकाश होने से देव शब्द से वेदों का ग्रहण किया है। जब मनुष्य लोग सत्य प्रेम के साथ वेदवाणी से जगदीश्वर की स्तुति करते हैं, तब वह परमेश्वर उन मनुष्यों को विद्यादान से प्रसन्न करता है, वैसे ही यह भौतिक अग्नि भी विद्या से कलाकौशल में युक्त किया हुआ ईंधन आदि पदार्थों में ठहरकर सब क्रियाकाण्ड का सेवन करता है ॥१२॥

इस बारहवें सूक्त के अर्थ की अग्नि शब्द के अर्थ के योग से ग्यारहवें सूक्त के अर्थ से सङ्गति जाननी चाहिए।यह बारहवाँ सूक्त और तेईसवाँ वर्ग समाप्त हुआ।

# अभिनवकालिदासोऽभिराजो राजेन्द्रमिश्रः

-डॉ.अरविन्दकुमारतिवारी, बागपतम

भारतवर्षस्य वसुन्धरा निरन्तरमलौकिकं कार्यं कुरुते। विश्वस्मिन् यत्किमपि आश्चर्यकरं वस्तु तदत्रैव विराजत इति मन्मतम्। यथा वेदा उपनिषदः पुराणानि काव्यानि नाटकानि चेति। स देशो भारताख्य एव यत्र जनिं लेभिरे महाकवयो वाल्मीकिव्यासकालिदासादयः, भासभारविभवभूतिबाणभट्टदण्डिप्रभृतयः। सततमियं पवित्रवसुधा कवीनां पीयूषवर्षिणां रसधारया सिक्ता विमोहयतीवेति नास्ति संशयः। इम एव महाकवयोऽद्यापि संस्कष्तवाङ्मयं रक्षन्ति। कालक्रमेण संस्कष्तकवित्वं वर्धमानमेवावलोक्यतेति। किन्तु यादृशं वैशिष्ट्यं महाकवेः कालिदासस्य कविताकानने दष्श्यते न तादृशमन्यत्रेति विजानीमो वयम्। सन्तीह अगणिताः कवयो वन्दनीयाः केचन श्लेषाश्लेषप्रयोगकुशलाः, केचन अर्थगौरवसन्निवेशदक्षाः, केचन ग्रन्थग्रन्थिरचनचतुराः, परन्तु वैदभीरीतिमतः कालिदासस्य स्थानं नैते लभन्ते। आसीत् किमपि विशिष्टं कारणं यतः केनचिदुक्तं



पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासः।

अद्यापि तत् तुल्यकवेरभावादनामिका सार्थवती बभूव।।

सकलकवीनामुपजीव्यभूतः कालिदास एव कलियुगे राजेन्द्रमिश्रनाम्ना भारतभूमौ संस्कष्तसंस्कषतिसंस्थापनाय अवतीर्ण इति मदीयं हृदयं स्पन्दमानमव्यक्तवाचा बोधयतीवेति। अहमेषां व्याख्यानेन काव्येन सुपरिचितो मनसैव शिष्योऽस्मीति निश्चितवानस्मि। स्मरामि तेषां व्याख्यानं यद्धि काशीहिन्दूविश्वविद्यालयस्य स्थापनास्थले मोरारिबापूकथावसरे रामकथाविषयकमासीत्। विज्ञापयामि यत् श्रीमान् मोरारिबापूमहोदयः सायंकाले विदुषां मुखेभ्यः मंचतः रामकथां श्रष्ण्वन्ति स्म। दिवसे तेषां पावनी कथास्मान् नन्दयति स्मेति। यस्मिन् दिने अभिराजराजेन्द्रमिश्रवर्याणां व्याख्यानमासीत् व्यतीतेऽपि समये जलरवो बहुधाश्रूयत यत् पुनरुच्यतां, भवतां कृते कालो वर्तते। एतावान् श्रोतष्णामनुरागो न सर्वत्र व्याख्यातृभिर्लभ्यते। विश्वस्मिन् रामकथा कीदष्शी वर्तत इति विषये अद्वितीयं श्रावं श्रावं व्याख्यानहममानन्दितोऽभवम्। अनेकधा सार्वभौमसंस्कृतप्रचारसंस्थाने मालवीयभवने श्रीमतां व्याख्यानमाकर्णितमधुनापि मानसं तच्छोतुं प्रेरयतीव।

आधुनिकसंस्कृतकविपरम्परायां भवन्तः सर्वश्रेष्ठं पदमधिकुर्वन्ति स्वसारस्वतसाधनयेति जानाति भारतम्। यद्यपि विजानन्ति संस्कृतज्ञास्तथापि नवयुवकवीनां परिज्ञानाय लेखोऽयमलेखि मया। एतेषां विषये लेखनं गगनमण्डलस्थतारकगणनमिव सुदुष्करमाभाति। अधावधि श्रीमिश्रवर्याणां भवतां पंचाशदुत्तरत्रयोदशसंख्यातोऽप्यधिका रचनाः स्फुटगीतालेखैकांकिसंस्मरण–

यात्रावष्त्तरिपोर्ताजवक्तव्यादित्वेन प्रकाशितास्सन्ति। 1

महाकविराजेन्द्रमिश्रमहोदयानां भवतां जानकीजीवनम्, वामनावतरणमिति महाकव्यद्वयं, पंचदशखण्डकाव्यानि,वाग्वधूटी, मृद्वीका, श्रुतिम्भरा, मधुपर्णी चेति चत्वारे गीतसंग्रहाः, चतस्रो गलज्जलिकाः कनीनिका मत्त्ज्जलिकाः कनीनिका मत्तवारिणी, शालभंजिका हविर्धानी चेति, बालगीतद्वयं सचित्रं कौमारम्, कान्तारकथा च, नव एकांकिसंग्रहः, नाट्यपंचगव्यं अकिंचनकाव्यकाव्यम्, नाट्यपंचामृतम्, चतुष्पथीयम्, रूपरुद्रीयम्, नाट्यसप्तपदम्, नाट्यनवग्रहम्, नाट्यनवरत्नम्, नाट्यनवार्णवम्, चतस्रो नाटकनाटिकाः प्रशान्तराघवम्, लीलाभोजराजम्, प्रमद्वरा विद्योतमा नाटिका च। षट्कथासंग्रहाः इक्षुगन्धा, रांगडा, चित्रपर्णी, पुनर्नवा, छिन्नमस्ता, अभिनवपंचतन्त्रम्। अष्टौ पाठ्यग्रन्थाः संस्कृतकाव्यत्रिपथगा, संस्कृतामष्तचन्द्रिका, किरातार्जुनीयं प्रथमसर्गः, कादम्बरीकथामुखम्, छन्दोऽलंकारसौरभम्, रसनिरूपणम्, साहित्यदर्पणः, परिच्छेदत्रयात्मकः, संस्कृतगद्यामृतम्। भवतां शास्त्रीयो ग्रन्थः अभिराजयशोभूषणं विलसति। 2

एतवत्यो रचना विलसन्ति संस्कृतवाङ्मये अतः अन्वर्थसंज्ञां लभन्त एते। सत्यमेव अभिराजनाम्ना विख्यातिं गता महाकवयो वन्दनीयाः, नवरचनाकाराणाम् उपजीव्यभूताः विगताभिमानेर्ष्याः निरन्तरं सुरभारतीसेवनाय कृतप्रयत्नाः निबद्धपरिकराः लक्ष्यन्ते। यस्मिन् काले संस्कृतार्जितवित्तास्वादपीवराः अलसशिरोमणयो शेरते तस्मिन्नपि काले अभिराजमहोदयाः यात्रामारभन्ते। अहो! दर्शनीयं व्यवहारमेषां स्मृत्वा नन्दामि। वस्तुतो भवादृशामेव विदुषां महाकवीनां सेवया संस्कृतं वर्धमानं वर्तते। एतावन्ति पुस्तकानि येषां पठने मादृशां जीवनं गमिष्यति। अनेन सारस्वतकर्मणा भवद्भ्यः साहित्याकादमी–वाचस्पतिसम्मान–कल्पवल्ली–महामहिमराष्ट्रपतिपुरस्कार–प्रभृतिशताधिकैः पुरस्कारैस्सम्मानैश्च पुरस्कृतः सम्मानिताः।

आशचर्योत्पादि वृत्तमेतद् यदाधुनिकसंस्कृतरचनाकारेषु सर्वाधिकशोधकार्यं भवतामेव रचनासु कृतमस्ति विविधविश्वविद्यालयानां शोध ार्थिभिः। भवतां पाण्डित्यं नाम्नैव परिज्ञायते। भवद्भिः सर्वकारपक्षतः बहुधा भारतीयप्रातिनिध्यं कृतमस्ति विदेशोष्वपि। बैंकाकएडिनवर्गईथोपियानेपालादिदेशेषु भवतां गमनेन संस्कृतसम्प्रचारो जातः संस्कृतिसंरक्षणं च जातमिति को न वेत्ति।

इलाहाबादशिमलासम्पूर्णानन्दविश्वविद्यालयेषु महती सेवा कृता भवद्भिः। सम्प्रति साहित्याकादम्यां संस्कष्तभाषासंयोजकपदं विभूषयन्तः सुरभारतीं वर्धयन्तो वर्तन्ते।

अनेकधा कविगोष्ठीषु भवद्भिस्साकं काव्यपाठास्वादो मया लब्धोऽस्ति। सरलहृदयाः विनीतस्वभावाः परमोदाराः स्वाभिमानैकधना भवन्तो दृष्टिमात्रेण दर्शकमाहरन्ति। भवतां रचनासु काचित् वेदना मुखरीभवति या प्रकटीकरोति यल्लोके दुर्जनाः सुजनान् वंचयन्ति पीडयन्ति च। प्रतीयते यद् भवतां जीवनं संधर्षमयमासीत्। पद्यमिदं विवष्णोति यत्

देहि यस्मै यशो दिग्दिगन्ताश्रितं

खादी वस्त्र ही नहीं, विचार है !

आदर्श ग्रामोद्योग समिति, दिल्ली

खादी वस्त्रों का विशाल भण्डार

✪ सूती खादी व रेडीमेड ✪ ऊनी खादी व कम्बल (रेडीमेड) ✪ रेशम साड़ी (रिल्ड) ✪ रेशम स्पन व रेडीमेड ✪ पोली खादी

सभी प्रकार की खादी व ग्रामोद्योग उत्पाद जैसे अचार, साबुन, तेल, शैम्पू, शहद,अगरबत्ती, च्यवनप्राश, त्रिफला आदि के लिये पधारें।

खादी ग्रामोद्योग भवन

✪ 10/105-A, सेक्टर-3, राजेन्द्र नगर, साहिबाबाद, (उ० प्र०)

✪ शेरपुर चौक, करावल नगर, दिल्ली-110094

फोन:-0120-2631855, 9899334204




ओ३म्

भारत में फैले सम्प्रदायों की निष्पक्ष व तार्किक समीक्षा के लिए उत्तम कागज, मनमोहक जिल्द एवं सुन्दर आकर्षक मुद्रण (द्वितीय संस्करण से मिलान कर शुद्ध प्रामाणिक संस्करण)

सत्य के प्रचारार्थ

सत्यार्थ प्रकाश

सत्य के प्रचारार्थ

| | | | |
|---|---|---|---|
| • प्रचार संस्करण (अजिल्द) 23×36÷16 | मुद्रित मूल्य 50 रु. | प्रचारार्थ 30 रु. | प्रचारार्थ मूल्य पर कोई कमीशन नहीं |
| • विशेष संस्करण (सजिल्द) 23×36÷16 | मुद्रित मूल्य 80 रु. | प्रचारार्थ 50 रु. | |
| • स्थूलाक्षर सजिल्द 20×30÷8 | मुद्रित मूल्य 150 रु. | | प्रत्येक प्रति पर 20% कमीशन |

10 या 10 से अधिक प्रतियाँ लेने पर विशेष अतिरिक्त कमीशन

कृपया, एक बार सेवा का अवसर अवश्य दें और महर्षि दयानन्द की अनुपम कृति **सत्यार्थ प्रकाश** के प्रचार प्रसार में सहभागी बनें

आर्ष साहित्य प्रचार ट्रस्ट
427, मन्दिर वाली गली, नया बांस, दिल्ली-6

Ph. :011-43781191, 09650622778
E-mail : aspt.india@gmail.com

# अरविन्दतिवारीविरचितबालगुञ्जनमिति बालसाहित्यस्य शुभाशंसनम्

**-डॉ.रसराजराजेन्द्रत्रिपाठी, प्रयागः**

अर्वाचीनसंस्कृतकाव्यविधासु अभिनवनवगीतविधायां बालसाहित्यमनुश्रित्य कविकुलकुमारःअरविन्दः एकपञ्चाशतबालगीतानां सङ्कलनं बालगुञ्जनमिति शीर्षकेण प्रकाशनार्थं यथाशीघ्रमेव तत्परोऽस्ति। जानन्ति भवन्तः आशुकविरूपेण कुमारोऽरविन्दः सम्प्रति संस्कृतस्य प्रचाराय प्रसाराय च यानि यानि साधनानि यत्रकुत्रापि समायोज्यन्ते दृश्यन्ते वा तत्र सर्वत्रापि मित्रवरोऽरविन्दः स्वकीयाशुकविताामाध्यमेन समेषां सहृदयसंस्कृतानुरागिणां हृदये स्वकीयेन




मृदुलविनीतव्यवहारेण सस्नेहसंभाजनः सम्भूय साम्प्रतिकसंस्कृतकविकुलगणनायां नितरां प्रतिष्ठामधिकरोतीति। इदानीं सचलदूरभाषयन्त्रस्यामुखपटले नैकाः संस्कृतसमूहाः संस्कृतस्य प्रचाराय प्रसाराय च सम्प्रचलन्ति। तत्र क्वचित् शास्त्रालोचनं प्रचलति, क्वचित् काव्यपाठो भवति, क्वचित् श्लोकपाठप्रतियोगिता चलति, क्वचिच् छन्दोगानप्रतियोगिताया: आयोजनं भवति । एवञ्च न केवलं रिकार्डिग माध्यमेनापितु ऑनलाइनजीवितप्रसारणमाध्यमेनापि विविधविषयविशेषज्ञानां सम्भाषणेन व्याख्यानादिकार्यक्रमाः समायोज्यन्ते। तेषां कार्यक्रमाणां संयोजकाः संचालकाः नित्यमेव नूतनविषयविशेषज्ञमेवामन्त्र्य सम्भाषणस्य प्रबन्धं समायोजयन्ति।स्वकीयेन पाण्डित्यप्रतिभयोः मणिकाञ्चनसंयोगसंवलितः कविवरोऽरविन्दः न केवलं पारम्परिकच्छन्दविरचने निष्णातोऽस्ति प्रत्युत संस्कृतगद्यलेखनेऽपि परं पारङ्गतोऽस्ति ।तस्य पूर्वप्रकाशिता कृतिः हा हन्त ! गद्यविधायां एकोपन्यासः अतीवलोकप्रियः शब्दसौष्ठवसम्पन्नः इति मन्यते। न केवलं उपन्यासः अपितु तस्य कृतिः नीतिकल्पद्रुमोऽपि सुभाषितमुक्तमालामिव शिरोधार्या सम्भूय अतिशोभापि सहृदयैः समाद्रियते ।।

बालगुञ्जनस्य समारम्भे गजाननं गणपतिं प्रति स्वकीयां नान्दीं ध्यायं ध्यायं तदुपरान्तमेव गुरुवरं श्रीवासुदेवं स्मारं स्मारं संस्तुतिं प्रणामाञ्जलिञ्च विनिवेद्य क्वचित्पिकस्य कलकलनिनादमनुस्मरति, क्वचिच्च ग्रामसराननुस्मृत्य बाललीलां स्मारयति। कविः अरविन्दः बालसाहित्यसंरचनायाः सत्प्रेरणा वस्तुतः तदाप्नोति यदा सः काञ्चीपुरीनगर्यां सम्मान्यसंयोजकेन डॉ.सम्पदानन्दमहोदयेन समायोजितसंगोष्ठ्यां प्रतिभागं नयनाय गन्त्रीयानेन स्वकीयां यात्रां समारब्धा। यात्रायामेव दीर्घकालिकप्रवासमनुभूय रेलयाने एव एवं मन्दं मन्दं गायं गायं बालगुञ्जनमिव किञ्चिद् गुञ्जन् गीतलेखने तत्परोऽभूत्। दूरभाषमाध्यमेन तेन कथितं यत् बालगीतसंरचना समारब्धा मया ।अहमपि स्वकीयां शुभाशंसां प्रददातुं स्वीकृतवान्। सप्ताहमात्रमेव समयसीमां प्रकल्प्य नैकानि गीतानि तेन विरचितानि। गन्त्र्यामेव गुञ्जं गुञ्जं गीतं गुञ्जन् बालगुञ्जनमेतादृशं बालसाहित्यं सार्धमासान्तरमेव समुद्भूतम्। श्रुत्वैव महदाश्चर्यं जायते यत् कथमेतदल्पावधौ एकपञ्चाशतगीतानि लिखितानि कविवर्येणारविन्देन।

अस्मिन् बालगीतावल्यामादौ कविरयमरविन्दो विघ्नविनाशकरं गजाननं गणपतिं वन्दमानः गुरुगोविन्दं वासुदेवमनुस्मरन् गीताञ्जलिं विनिवेदयति। तदनन्तरं बालानां रुचिमाश्रित्य क्वचिद् ग्रामसरः पिकः, पुत्तलिका, गजराजः वानरः,शकटम्, गन्त्री, मेला, प्रहेलिका,वर्षा, स्वच्छता, दूरभाषः, भिक्षुकः, दरिद्रार्भकः, सैनिकः, पिता, विभवः, श्रीरामः, श्रीकृष्णः, भारतम्, तिरङ्गाध्वजगानम्, बालकध्रुवः अभिमन्युः, कौटिल्यः इत्यादयः विविधाः शीर्षकाः समुद्धृत्य बालोचितगीताञ्जलिं प्रस्तौति।

कृष्णस्य बाललीलामाश्रित्य नैकानि गीतानि लिखितानि। श्रीरामं हनुमन्तं बलरामकृष्णमभिलक्ष्य तेषां बाललीलां प्रदर्शयति देवार्चनां च विदधाति।

गुरुवन्दनं प्रस्तौति कविः -

गुरुवर्यवासुदेवं हृदयेन पूजयेऽहम्।
कृपया तवाशिषेदं गुरुवर्यधूलिकल्पम्।
मम जीवनं प्रशस्तं जातप्रसारयेऽहम्।।

यात्रायामेव गन्त्रीमभिलक्ष्य लिखति स्वानुभवं गीतेऽस्मिन् कविः अरविन्दः ।

गन्त्री याति गन्त्री याति, प्रियामदीया गन्त्री याति ।
कुरुते पों पों चलति सहर्षम्, विरमति स्वल्पं स्थाने शीघ्रम् ।
ददते चायं भोज्यं पेयम्, क्रीडनकं मिष्टान्नं सेयम्।।

राष्ट्रियभावनानामातन्वयन् देशस्य रम्यतां वर्णयति कविः -

मम देश एष भव्यः, बहुरोचते सुरम्यः,
विविधाश्च वेषभूषाः पूजाविधिः प्रशस्यः।
बहुधर्मजातिसेव्यः !! मम देश एष भव्यः !!

तिरङ्गाध्वजगानमति रोचते बालगुञ्जनेऽस्मिन् -

तिरङ्गाध्वजो यस्य हस्ते स पूज्यो, जनो भारतीयः प्रवीरः सहर्षम्।
तिरङ्गाध्वजो यस्य हस्ते न दृष्टः, स हेयः स हेयः स हेयः सगर्वम्।
तिरङ्गाविहीनः करः शक्तिहीनः, तिरङ्गायितं मानसं सौख्यलीनम्।
तिरङ्गान्वितं मे वचो हे सखायः, तिरङ्गाकुलः प्राणवायुर्मदीयः ।।

पिपीलिकामपि दृष्ट्वा कविः ऐकत्वस्य भावनां प्रतनोति-

पिपीलिकां सम्पश्यतु बन्धो!
संघे याति सदा मुदिताः., शिक्षयतीव सखे लघु देहा ।
संघे निवसतु सा तृषिताः ।।

कवेः मनसि तस्य दशवर्षीयः बालकोऽपि सम्प्रेरयति जीवनचक्रस्य गतिशीलतां येन स लिखति-

दशवर्षीयो न्यगदत् पुत्रः,
निशि विभवो मां मनोगतम्।
रेलयानयात्रासमतुल्यम्,
जीवनमस्ति पितः निखिलम्।।

बालप्रार्थनामपि कथं विस्मार्यते कविवर्येण. लिखति स गीतिरियम् -

भगवन् जगदीशमदीयमिदं, विमलं प्रकरोषि चलं न मनः ।
व्यथितं रमते सदने न वने, न जने भजने सुहृदां वचने,
निजसंस्तवसंश्रणेऽनुदिनं, परनिन्दनकर्मरतं भगवन्।।
एवञ्च देशेऽस्मिन् सर्वसुखलालसां वाञ्छन् कविः प्रार्थयेगीतेऽस्मिन्-
सखे वर्धतां भारतं कामयेऽहं, विना भेदभावं हृदा प्रार्थयेऽहम्।
क्वचिच्छ्रूयतां नाघनस्योपहासः, न वाकर्णयतां भो धनाढ्याट्टहासः ।
प्रभूयात्स्वदेशे सदुल्लासवासः, प्रफुल्लावनं भारतं भावयेऽहम्।।

एवञ्च सुकविना बालभावेनैव स्वकीयां मनोवृत्तिं येनकेनप्रकारेण सरलसहजशब्दसङ्कलनेन संगुम्फितरसमाधुर्येण प्रकटयति स्वीयसंकल्पनां बालसाहित्येऽस्मिन्। अन्ते च एतस्य बालसाहित्यस्य सफलप्रकाशनाय अहमपि स्वीयं वर्धापनं शुभाशंसां च विनिवेद्य विरामि।

प्रकाशक
एजुकेशनल बुक सर्विस
एन 3/15ए डी के रोड, मोहन गारिडन,
उत्तमनगर, नई दिल्ली 110059 मो 9899665801
मूल्यं 150 रुप्यकाणि।

# मेघनर्तनम्

**-डॉ. शैलेशकुमारतिवारी**
उत्तराखं. सं.वि.वि. हरिद्वारम्

नटति नटनपटुमत्तमना रे।
अद्य मयूरी दृष्टघना रे।।

पुलकितगात्रचपलनयना रे,
विवृतविचित्रललितडयना रे।
कृतसखिजनसुवलयवयना रे
रससदनीकृतविरसवना रे।। नटति...

प्रवहदजवनपवनपरिपुष्टा
नदनुसुमन्दनदनपरितुष्टा।
समशीतोष्णसमयरयजुष्टा
मार्दवदमितसमदमदना रे।।नटति...

नवलोल्लासलसितकललपना
लवणलास्यलालितललललना ।
प्रेमोपास्तिनिपुणनिश्छलना
रसमयभावभरितगमना रे।।नटति...

रुचिरदिदृक्षितजलधरआस्तः
तीक्ष्णतापनिचयोऽद्य समाप्तः।
मानसमोदपयोधिरवाप्तः
इति विहसति लोकितगगना रे।।नटति...

धन्योऽयं पर्जन्यविलासो
वितनितततभुवनमृदुहासः।
संचारितरमणीयविभासो
यं प्रविलोक्य मुदितवदना रे।। नटति...

# वृष्टिः

-डॉ.अरविन्दकुमारतिवारी, बागपतम्

अद्य वृष्टं घनैः प्लावितैषा धरा
तृप्तजीवाः प्रसन्ना गवेन्द्रादयः।
स्नातमेतैर्जनैर्मेघसंवृष्टिभिः
नन्दितेयं लतावल्लरी हर्षदा।

सायमद्यागता हारिणी मानिनी
वृष्टिरेषा चमत्कारिणी कामिनी।
मुक्तकेशा मदीया सुपुत्रा प्रिया
मोहयन्ती मनो नोऽहरद्धामिनी।।

क्षेत्रमेतद् गृहं वृक्षपत्रादिकं
तोयसंस्पर्शतुष्टं समालोक्यते।
यात्यहो मानवो मित्र नद्यां यथा
नौकया मुख्यमार्गे चलन् दृश्यते।।

नैजसौधोच्चदेशे प्रियाया: प्रिया:
स्वल्पवस्त्रान्विता नृत्यमग्ना जनाः।
आह्वयन्तीव मां किं ब्रवीमि प्रियं
स्नातमत्राधुना भार्यया नो मया।।

यः प्रतापः शरीरे मदेये स्थितः
मेघ ते वर्षणैर्यात एवाप्रियः।
जीव जीमूत लोके प्रपूज्यन् जनैः
संहरन् सूर्यतापं सखे कामये।।

# वेदना

इदानीं भारती देशे सुतैः संरक्ष्यते विरलैः।
न विज्ञो गृह्यते वृत्तौ विमूढो चीयते सबलैः।। 1

सुविज्ञो ज्ञायते विबुधैः समक्षस्थो ध्रुवं कैश्चित्
प्रभो नो पृच्छ्यते सम्यक् विधूर्तैः पृच्छकैश्चपलैः।।2

न शास्त्रार्थो जनैः पृष्टो न भावार्थः समाम्नातः।
न पद्यं संश्रुतं मधुरं त्वहम्मन्यैरहो प्रबलैः।। 3

न भावः संस्कृतस्तेषां न रावः संस्कृतो येषां
विसर्ज्यत एव विद्वांसैर्विशिष्टो मूढजैर्विकलैः।।4

कदैषा कुव्यवस्थेयं विनष्टा देशतो भविता।
हरे ध्यानं त्वया देयं हृदा भाषे रवैरमलैः।।5

वृथा गीता स्वदेशेह्यस्मिन् वृथा वेदोक्तयो न कथम्?
मुनीनां भारतं दनुजैः प्रदुष्टं रम्यकं निखिलैः।। 6

मदुक्तं मन्यतां त्वरितं समाजार्थं प्रियं वचनम्।
स्वदेशात् त्वं विदेशं नीयसे निगदाम्यहं कुखलैः।। 7

# 'मनोगतम्' - 46

## प्रसारण-तिथिः - 29-07-2018



-संस्कृत-भाषान्तरं
द्वारा- डॉ.बलदेवानन्द सागरः
Cell- 9810 5622 77
Email - baldevanand.sagar@gmail.com

मम प्रियाः देशवासिनः, नमस्कारः ! एतेषु दिनेषु अनेकेभ्यः स्थानेभ्यः समीचीनायाः वर्षायाः वृत्तानि अधिगम्यन्ते। कुत्रचित्तु समधिकायाः वर्षायाः कारणात् चिन्तायाः अपि वृत्तानि अवाप्यन्ते। अपि च, केषुचित् स्थानेषु साम्प्रतमपि जनाः वर्षां प्रतीक्षन्ते। भारतस्य विशालता, विविधता च स्तः, कदाचित् वर्षापि रुचित्वम् अरुचित्वं च प्रदर्शयति, परन्तु कथं वयमत्र वर्षायाः दोषम् अभिमन्यामहे ? मनुष्यः एवास्ति यो हि प्रकृत्या साकं संघर्षस्य मार्गं अवाचिनोत्। अस्य परिणामत्वेन एव कदाचित् प्रकृतिरेषा रुष्टा भवति। तथा च, एतस्मादेव कारणात् अस्माकं सर्वेषामपि दायित्वं भवति यत् वयं प्रकृति-प्रेमिणः भवेम, वयं प्रकृति-रक्षकाः स्याम, वयं प्रकृतेः सम्वर्धकाश्च भवेम, एवमाचरिते सति यानि प्रकृतिदत्त-वस्तूनि सन्ति तेषु स्वतः एव सन्तोलनं सन्धारितं भवति।

विगतेषु दिनेषु तादृशी एवैका प्राकृतिका- पदायाः घटना अशेष-विश्वस्य ध्यानमाकर्षयत्, मानव-मनांसि च प्राकम्पयत्। भवद्भिः सर्वैरपि दृश्यवाहिन्यां दृष्टं स्यात्, थाईलैंड-देशे द्वादशानां किशोराणां पाद-कन्दुक-क्रीडकानां वृन्दं, तेषां च प्रशिक्षकः भ्रमणार्थं गुहायां गताः। तत्र प्रायेण गुहायां प्रवेशार्थं ततः निर्गमनार्थं च, कतिपय-होरावधिकः कालः अपेक्षते। परञ्च तस्मिन् दिने दैवेन किमपि अन्यदेव निर्णीतमासीत् । यदा ते गुहायाः सुबहु आभ्यन्तरं प्रविष्टाः- सहसा मूसलाधार-वृष्टिकारणात् गुहायाः उपद्वारम् अतिमात्रम् जलं सञ्चितं जातम् । तेषां बहिः निर्गमनस्य मार्गः अवरुद्धो जातः। न कश्चन अपरो मार्गः लब्धः एतस्मात् ते गुहान्तर्वर्तिनि एकस्मिन् लघु-केदारे अवस्थिताः - तच्च न केवलं एक-द्वि-दिवसार्थं - अष्टादश-दिन-पर्यन्तम् ! किं भवन्तः कल्पयितुं शक्नुवन्ति यत् किशोरावस्थायां यदा पुरतः एव मृत्युः अवलोक्यते तदा प्रतिपलं युगायते इति ! एकतः ते संकट-प्रतीकारं कुर्वन्तः आसन्, अपरतश्च अखिलेह्यपि विश्वे मानवता एकीभूय ईश्वर- दत्तान् मानवीय-गुणान् प्रकटयति स्म। विश्वस्मिन् विश्वे जनाः एतान् बालकान् सुरक्षितान् एव बहिः निष्कासयितुं प्रार्थना-निरताः आसन्।

एतदवगन्तुं सर्वविधोह्यपि प्रयासः विहितः यत् बालकाः सन्ति कुत्रेति ? कस्यां दशायाञ्च वर्तन्ते ? केन प्रकारेण ते बहिः निष्कासयितुं शक्यन्ते ? यदि सुरक्षाकार्यं काले एव न सञ्जातं चेत् तर्हि प्रावृट्-ऋतौ कतिपय-मास-पर्यन्तं तेषां बहिः निष्कासनं शक्यं नाभविष्यत्। अस्तु ! यदा शुभ-वृत्तं प्राप्तं तदा अशेष-विश्वं शान्तिमन्वभवत्, सन्तोषोह्यजायत, परञ्च पूर्णमेनं घटनाक्रमम् अपरेण मन्तव्येन अपि विचारयितुं मम मानसमभिलषति यत् कृत्स्नमपि सुरक्षा-साहाय्य-कार्यं केन प्रकारेण प्रचालितम् ? प्रत्येकमपि स्तरे यो दायित्वानुभवः जातः सोह्यद्भुतः आसीत्। सर्वेह्यपि,भवतु नाम तत् प्रशासनं वा एतेषाम् निरुद्धानां बालानां पितरौ, भवन्तु वा तेषां कुटुम्ब-जनाः वा सञ्चार-माध्यमानि, भवेद्वा सः देशस्य नागरिकः - प्रत्येकमपि शान्तेः धैर्यस्य च अद्भुताचरणम् अकरोत्। सर्वेह्यपि 'संगछध्वं संवदध्व' मिति कृत्वा समूह-भावेन एकीभूय स्वकार्येह्यस्मिन् संलग्नाः आसन्। सर्वेषामपि संयमितो व्यवहारः ! - अवगच्छामि यत् शिक्षणस्य विषयोह्ययमम्, अवगमनस्य पाठ-सदृशः। एवं नासीत् यत्तेषाम् पितरौ दुःखितौ नाभविष्यताम्, एवमपि नासीत् यत् जनन्याः अक्ष्णोः अश्रूणि नैव निरगच्छन्, परन्तु धैर्यम्, संयमः, सम्पूर्णस्यापि समाजस्य शान्तचित्त-व्यवहारः - एतत्सर्वमेव सर्वेषामपि अस्माकं कृते शिक्षणीयं वर्त्तते । अस्मिन् पूर्णेह्यपि सुरक्षा-साहाय्य-कार्ये थाईलैंडस्य नौसेनायाः अन्यतमः सैनिकः हुतात्मः सञ्जातः । कृत्स्नमपि विश्वम् आश्चर्यचकितमस्ति यत् एतादृशीषु कठिन-परिस्थितिषु सतीषु जलपूरितायाम् अन्धकार-पूर्णायां च गुहायां एतावता साहसेन धैर्येण च साकं ते निजाशां नैव त्यक्तवन्तः। एतत्तु नूनं प्रमाणयति यत् मानवता यदा सम्भूय पुरो याति, अद्भुत-वस्तूनि सम्पद्यन्ते। केवलमिदमेव अवधेयं यद् वयं शान्त-स्थिर-मनसा निजलक्ष्यमादध्याम, तदर्थं कार्यनिरताः च भवेम।

विगतेषु दिनेषु अस्माकं देशस्य प्रियः कविः नीरजः अस्मान् विहाय प्रयातः। नीरज-कवेः अनन्य-तमा विशेषतासीत् - आशा, विश्वासः, दृढसंकल्पः, आत्मनि च प्रत्ययः। अस्मान् हिन्दुस्थानीयान् अपि नीरज-कवेः प्रत्येकमपि पंक्तिः सबलीकर्तुं प्रेरयितुं चार्हति। सोह्यलिखत् -

'अँधियार ढलकर ही रहेगा,
आँधियाँ चाहे उठाओ,
बिजलियाँ चाहे गिराओ,
जल गया है दीप तो अँधियार ढलकर ही रहेगा'।

नीरज-वर्याय सादरं श्रद्धाञ्जलिम् अर्पयामि।

'नमस्ते ! प्रधानमन्त्रि-महोदय ! मम नाम सत्यम् । अहं वर्षेह्यस्मिन् दिल्ली-विश्व-विद्यालये प्रथमे वर्षे प्रवेशम् अलभम् । अस्माकं विद्यालयस्य board exams-इति मण्डलीय-परीक्षा-काले भवान् अस्माभिः सह परीक्षायाः उद्वेगस्य, शिक्षायाः च विषये अभाषत। मत्सदृशानां छात्राणां कृते साम्प्रतं भवतः को नाम सन्देशः।'

जुलाई-ऑगस्ट-मासौ कृषकाणां सर्वेषाम् च यूनां कृते अतितरां महत्वपूर्णौ स्तः। यतो हि एष एव कालो भवति यदा महाविद्यालयानां तुंगत्वमनु- भूयते। 'सत्यम्'-सदृशाः लक्षशो युवानः विद्यालयेभ्यः निष्क्रम्य महाविद्यालयेषु प्रविशन्ति । फेब्रूआरि-मार्च-मासौ परीक्षासु, प्रश्न-पत्रेषु, उत्तरेषु च प्रयातश्चेत् एप्रिल्-मे-मासौ अवकाशानन्द-विहरणैः सह परिणामे, जीवनस्य भावि-कार्यदिशश्च निश्चेतुं, आजीविका-चयनादिषु व्यतीतौ भवतः। जुलाई नाम सः मासः यदा युवा निज-जीवनस्य नूतने क्रमे पदमादधाति, यदा अवधानं प्रश्नान् परिहाय cut-off- इति अङ्क-निर्धारणे भवति। छात्राणामवधानं गृहात् निर्गत्य छात्रावासं प्रति याति। छात्राः पित्रोः छायां विहाय प्राचार्याणां छायासु समायान्ति। दृढम् विश्वसिमि यत् मम युव-मित्राणि महाविद्यालयीय-जीवनस्य आरम्भमभिलक्ष्य नितराम् उत्साहिनः प्रसन्नाश्च स्युः। प्रथम-वारं गृहात् बहिः निर्गत्य प्रस्थानम्, ग्रामतो बहिर्गमनम्, संरक्षणात्मकात् परिवेशात् निर्गत्य आत्मनः एव निज-सारथित्वेन स्वीकरणम्। एतावन्तो बृहन्मात्रिकाः युवानः प्रथमवारं निज-निज-गृहाणि त्यक्त्वा, निज-जीवनस्य नवीनां दिशं निश्चेतुं निर्यान्ति। कतिचन छात्रास्तु साम्प्रतं यावत् निज-निज-विद्यालयेषु गमनमपि, स्याद् आरप्स्यन्त, केचन तु महा-विद्यालयेषु गमनोत्सुकाःस्युः। भवतः सर्वान् इदमेव ब्रवीमि यत्- be calm, enjoy life, शान्त-मनसा जीवने अन्तर्मनसः पूर्णानन्दमनुभवन्तु । पुस्तकानि अतिरिच्य तु नान्योपायो विद्यते, अध्ययनन्तु करणीयमेव, परञ्च नव-नवीनानां वस्तूनामन्वेषण-प्रवृत्तिस्तु सततं सन्धारणीया एव। पूर्वतनानां मित्राणां नैजमेव महामूल्यमस्ति। शैशवस्य मित्राणि मूल्यवन्ति भवन्ति, परञ्च नवीनानां मित्राणां चयनम्, मैत्रीकरणं तथा च मैत्री-निर्वहणम्,इदं हि सर्वं स्वतः एव अतितराम् प्रबोध-विषयोभवति। किञ्चित् नूतनं शिक्षेमहि, यथा नव-नवीनां दक्षतां, नूतनाः भाषाश्च अवगच्छेम। ये युवानः निज-गृहाणि विहाय बहिः अन्यत्र पठनार्थं गताः, ते नूनं तानि स्थलानि परिज्ञातुं प्रयतेरन्, तत्रत्यैः स्थानै अवगताः स्युः, तत्रत्यान् जनान्, भाषां, संस्कृतिं च जानीयुः, तत्रत्यानि पर्यटनस्थलानि गत्वा, तेषां विषये अवगच्छेयुः। नूतन-जीवन-क्रमोत्सुकेभ्यः सर्वेभ्यः युव-जनेभ्यः मम शुभकामनाः। नातिचिरं वार्त्तासु अहम् अवालोकयम् यत् केन प्रकारेण मध्यप्रदेशस्य अतितरां निर्धन-परिवारस्य छात्रेण आशाराम-चौधरिणा जीवनस्य कठिनतराणि समाह्वानानि अतिक्रम्य सफलता प्राप्ता। सः जोधपुरस्य AIIMS-इत्यस्य MBBS-परीक्षायां स्वीय-प्रथमे प्रयासे एव सफलो जातः । तस्य पिता अवकरान् सञ्चित्य निज-कुटुम्बं पालयति पोषयति च । अहं तस्य सफलतामिमां अभिलक्ष्य तं वर्धापयामि। एतादृशाः अनेके छात्राः सन्ति ये निर्धन-कुटुम्बस्य सदस्याः वर्त्तन्ते तथा च, सतीष्वपि विपरीत-परिस्थितिषु निज-श्रमेण संलग्नतया च ते तादृशम् किमपि कृतवन्तः, यद्धि अस्मान् सर्वान् अपि सततं प्रेरयति। भवतु नाम सः दिल्ल्याः प्रिन्स्-कुमारः, यस्य पिता DTC- इति दिल्ली-परिवहन-निगमे बस-यान-चालकः उताहो स्याद्वा सः कोलकातायाः अभय-गुप्ता, यो हि पादमार्गोपरि वीथी-विद्युद्दीपानामधस्तात् निजाध्ययनं पूर्णतामनयत् । भवतु सा अमदाबादस्य दुहिता आफरीन-शेखः, यस्याः पिता auto-rickshaw-यानं चालयति । स्याद्वा सा नागपुरस्य पुत्री खुशी, यस्याः पितापि विद्यालयीय-बस-यानस्य चालकोह्यस्ति अथवा भवेद्वा हरियाणा-राज्यस्य कार्तिकः, यस्य पिता रक्षिकोह्यस्ति अथवा भवतु वा सः झारखण्डस्य रमेश-साहुः यस्य पिता इष्टिकापाके श्रमिकोह्यस्ति । स्वयं रमेशः अपि मेलके क्रीडनकानि विक्रीणाति स्म अथवा भवतु सा गुरुग्रामस्य दिव्याङ्गा पुत्री अनुष्का पाण्डा, या हि जन्मना एव spinal muscular atrophy – नामकेन आनुवंशिक-रोगेण पीडितास्ति, एते सर्वेह्यपि निज-दृढसंकल्पेन साहसेन च प्रत्येकमपि अवरोधमतिक्रम्य -जगद्दृश्यां सफलतामवाप्नुवन् । वयं परितः पश्येम चेत् तदा एतादृन्शि अनेकानि उदाहरणानि अधिगन्तुं शक्नुमः।

देशस्य कस्मिन्नपि कोणे जायमाना काचिदपि शुभा घटना मम मानसं सम्बलयति, प्रेरयति, तथा च यदा एतेषां यूनां कथाः भवतः श्रावयामि तदा नीरज-कवेः अपि तां पङ्क्तिं स्मरामि, एवं हि जीवनस्य तदेव लक्ष्यम् भवति । नीरज-वर्यः कथयति-

'गीत आकाश को धरती का सुनाना है मुझे,
हर अँधेरे को उजाले में बुलाना है मुझे,
फूल की गंध से तलवार को सर करना है,
और गा-गा के पहाड़ों को जगाना है मुझे'

मम प्रियाः देशवासिनः, कतिपय-दिनेभ्यः प्राक् मम दृष्टौ एका वार्त्ता समागता, लिखितमासीत् - 'युवक-द्वयेन मोदिनः स्वप्नः साकारीकृतः'। यदा अन्तः पठितं तदा ज्ञातं यत् केन प्रकारेण अद्यत्वे अस्माकीनाः युवानः प्रविधेः पेशलं रचनात्मकञ्च प्रयोगं कृत्वा सामान्य-जनानां जीवनानि भद्रतराणि कर्तुं प्रयतन्ते। घटना एवमासीत् यत् एकदा अमेरिकायां San Jose-नगरे, यद्धि Technology Hub – इति प्रविधि-केन्द्र-रूपेण प्रख्यातमस्ति,तत्राहं भारतीय-युवभिः साकं चर्चां कुर्वन् आसम् । अहं तान् निवेदितवान् यत्ते भारतस्य कृते निज-प्रतिभां केन प्रकारेण समुपयोक्तुमर्हन्तीति नूनं विचारयेयुः, अपि च किञ्चित्-कालं प्रदाय अवश्यं किञ्चित् कुर्युः। अहं Brain-Drain-इति बौद्धिक-पलायनं Brain-Gain-इति बौद्धिकोपलब्धित्वेन परिवर्त्तयितुमध्यर्थितवान् । रायबरेली-नगरस्य IT Professionals-इति सूचना-प्रविधि-व्यावसायिक-द्वयं, योगेश-साहूजी रजनीश-बाजपेयीजी च मम समाह्वानमिदं स्वीकृत्य अभिनव- प्रयासमेकं विहितवन्तौ। स्वीयं professional skills-इति व्यावसायिक-कौशलमुपयुज्य योगेशजी रजनीशजी च सम्भूय SmartGaon App-इत्युपकरणं सज्जीकृतवन्तौ। App-इत्युपकरणमिदं न केवलं ग्रामीणान् शेष-विश्वेन संयोजयति परञ्च इतः परं ते काञ्चिदपि विज्ञापनां सूचनाञ्च स्वयमेव नैजे जङ्गम-दूरभाषोपकरणे एव प्राप्तुमर्हन्ति। रायबरेली-जनपदस्य ग्राम-तौधकपुरस्य निवासिनः, ग्राम-प्रधानः, जनपद-दण्डाधिकारी, मुख्यः विकासाधिकारी चेति सर्वेह्यपि, अस्योपयोगार्थं जनान् जागरूकान् व्यदधुः। एतत् App-इत्युपकरणं ग्रामेषु आपाततः Digital-इति अङ्कीयक्रान्तिं प्रवर्त्तयितुं सहायकं भवति। ग्रामेषु यानि विकास-कार्याणि जायन्ते, तेषाम् अभिलेखनम्, अन्वेषणम्, निभालनञ्च अमुना उपकरणेन सरलतरं जातम्। अस्मिन् SmartGaon App-इत्युपकरणे ग्रामस्य phone directory, News section, events list, health centre, Information centre चेति दूरभाषनिर्देशिका-वार्त्ताप्रभाग-कार्यक्रमसूची-स्वास्थ्य-केन्द्र-सूचना-केन्द्राणि वर्त्तन्ते । इदमुपकरणम् कृषकाणां कृते सुबहु लाभप्रदमस्ति । घटनामेनां यदि भवन्तः सूक्ष्मतया परिशीलयन्ति चेत् नूनमिदमनुभविष्यन्ति यत् सः युवा अमेरिकायां जीवनं यापयन् अपि निज-ग्रामीण-जीवनस्य सूक्ष्मतां समाह्वानानि चावगच्छति, ग्रामेण साकं भावनात्मक-रूपेण सम्बद्धोह्यस्ति। निज-ग्रामेण, स्वीयैः मूलैः च संसक्तिः निज-राष्ट्रं मनसि निधाय च किञ्चत्-करणस्य भावः प्रत्येकमपि हिन्दुस्थानीयस्य चेतसि स्वाभाविकरूपेण भवति। परञ्च कदाचित्तु समयाभावकारणात्, कदाचित् भौगोलिकान्तराल-हेतोः, कदाचिद्वा परिस्थितिकारणात्, अत्र ईषत् भस्मावलेपो भवति किन्तु लघु-स्फुलिङ्गस्यापि स्पर्शेण ताः सर्वाः अपि स्मृतयः पुनरुज्जीवन्ति, अतीतञ्च अक्ष्णोः पुरस्तात् समुपतिष्ठते। अस्मदीया स्थितिः कीदृशी इति वयमपि अवश्यं विचारयेम।

'आदरणीय ! प्रधानमन्त्रि-महोदय ! नमस्कारः, अहं सन्तोष-काकड़े, महाराष्ट्रस्य कोल्हापुरतः संवदामि। पंढरपुरस्य वारी, महाराष्ट्रस्य प्राचीना परम्परास्ति। प्रतिवर्षं महता उत्साहेन संरम्भेण चायोज्यते। प्रायेण सप्ततः अष्ट-लक्षमिताः वारकरी-श्रद्धालवः अत्र सम्मिलिताः भवन्ति। अस्य अद्भुतस्य उपक्रमस्य विषये शेष-देशवासिनोह्यपि अवगताः स्युः, अतः भवान् वारी-विषयिणीम् इतः परामपि सूचनां ददातु।'

सन्तोषजी ! भवतः दूरभाषाकारणायै भूरिशो धन्यवादाः। सत्यं, पंढरपुरस्य वारी स्वप्रकारिका अद्भुता यात्रास्ति। सखायः ! आषाढ-मासीया एकादशी या हि ऐषमः जुलाई-मासे त्रयोविंशे दिने आसीत्, एतद्दिनं पंढरपुरवारी-इत्यस्याः परिणितिरूपेणापि आयोज्यते। पंढरपुरं हि महाराष्ट्रस्य सोलापुर-जनपदस्य अन्यतमं पवित्र-नगरमस्ति। आषाढीयैका- दश्याः प्रायेण पञ्चदशभ्यः विंशतेश्च दिनेभ्यः प्राक् एव वारकरी अर्थात् तीर्थयात्रिणः शिबिकाभिः साकं पंढरपुरयात्रार्थं पद्भ्यामेव निर्गच्छन्ति। वारी- इत्यस्यां यात्रायां लक्षशो जनाः सम्मिलिताः भवन्ति। सन्त-ज्ञानेश्वर-सन्त-तुकाराम-सदृशानां महापुरुषाणां साधूनां पादुकाः, शिबिकायां स्थापयित्वा विट्ठल-विट्ठल-इति गायन्तः, नृत्यन्तः, वाद्यानि वादयन्तश्च पद्भ्यामेव पंढरपुरं प्रत्यग्रेसरन्ति। एषा वारी शिक्षा-संस्कार-श्रद्धानां त्रिवेणी वर्त्तते । भगवतो विट्ठलस्य, यो हि विठोबा वा पांडुरंगः इति नाम्नापि गीयते, तस्य दर्शनार्थं तीर्थयात्रिणः तत्र प्राप्नुवन्ति। भगवान् विट्ठलः निर्धनानां, वञ्चितानां, पीडितानाञ्च हितानि रक्षति। महाराष्ट्र-कर्नाटक-गोवान्ध्रप्रदेश-तेलंगाना-वास्तव्येषु प्रगाढा श्रद्धास्ति, अचला च भक्तिरस्ति। पंढरपुरे विठोबा-मंदिर-गमनस्य तत्रत्यमहिमानः, सौन्दर्यस्य, आध्यात्मिकानन्दस्य च पृथगेव कश्चन अनुभवोह्यस्ति। 'मन की बात'-प्रसारणस्य श्रोतारः साग्रहं मया निवेद्यन्ते यत् ते प्राप्ते सत्यवसरे एकवारम् अवश्यं पंढरपुर-वारी-यात्रायाः अनुभवमादद्युः। ज्ञानेश्वर-नामदेव-एकनाथ-रामदास-तुकाराम-प्रभृतयोह्यगणिताः सन्तः महाराष्ट्रेह्यपि सामान्य-जनान् शिक्षयन्ति। अन्धश्रद्धाम् विरुद्धय संघर्षस्य शक्तिम् प्रददति तथा च हिन्दुस्थानस्य

शेषभागःसप्तमपुटे

प्रत्येकमपि कोणे एषा सन्त-परम्परा सततं प्रेरयति। भवतु नाम सः भारुडः वा अभंगः, वयम् तेभ्यः सद्भाव-प्रेम-भ्रातृत्वस्य महत्वपूर्णं सन्देशं प्राप्नुमः। एते ते जनाः आसन् ये हि काले काले समाजमवरोधित- वन्तः, प्रबोधितवन्तः, मुकुरमपि प्रदर्शितवन्तः तथा च सुनिश्चितमिदम् अकुर्वन् यत् प्राचीनाः कुप्रथाः अस्मदीय-समाजात् निरस्ताः भवेयुः, जनेषु च करुणा-समानता-शुचितादीनां संस्काराः भवेयुः। अस्मदीयैषा भारत-भूमिः बहुरत्ना वसुन्धरास्ति, यथा सत्पुरुषा- णाम् एका महती परम्परा अस्माकं देशे आसीत्,तथैव सामर्थ्यवन्तः मातुः भारत्याः समर्पिताः महापुरुषाः, अस्यै धरायै निजजीवनानि आहुतवन्तः, समर्पितवन्तश्च। एतेषुअन्यतमः महापुरुषः अस्ति लोकमान्यः तिलकः,येन अनेकेषां भारतीयानां मनस्सु निज-गहनः प्रभावः प्रतिष्ठापितः। वयं जुलाई-मासस्य त्रयोविंशे दिने, तिलक-वर्यस्य जयन्तिम् ऑगस्ट्-मासे प्रथमे दिने, तस्य च पुण्यतिथिम् आलक्ष्य तस्य पुण्य-स्मरणम्कुर्मः। लोकमान्यः तिलकः साहसात्म-विश्वासाभ्यां सम्भरितः आसीत्। तस्मिन् आङ्गल-शासकानां त्रुटीः प्रदर्शयितुं शक्तिः बुद्धिमत्ता च आस्ताम्। आङ्गल-शासकाः लोकमान्य-तिलकात् एतावन्तः भीताः आसन् यत् ते विंशतौ वर्षेषु तस्मिन् वार-त्रयं राजद्रोहारोपं प्रवर्त्तयितुं प्रायतन्त,तथा च नायं कश्चन लघु-विषयः। अहं, लोकमान्यतिलकस्य,अमदावादे तस्य च प्रतिमया सम्बद्धामेकां रुचिकरीं घटनामद्य देशवासिनां पुरस्तात् स्थापयामि। विगते शताब्दे षोडशे वर्षे ऑक्टूबर-मासे, लोकमान्यतिलक-वर्यः यदा अमदावादमागतः,तस्मिन् समये, अद्यतः प्रायेण शतं वर्षेभ्यः प्राक्,चत्वारिंशत्सहस्राधिकाः जनाः अमदावादे तस्य स्वागतमकार्षुः,अपि चास्याः यात्रायाः अवसरे सरदारवल्लभभाई-पटेलः तेन साकं सम्भाषणावसरम् अलभत। सरदारवल्लभभाई-पटेलः लोकमान्यतिलक-वर्येण अत्यधिकं प्रभावितः आसीत्। विगते शताब्दे विंशतौ वर्षे ऑगस्ट्-मासे प्रथमे दिने लोकमान्य-तिलक-वर्यस्य प्राण-त्यागः अजायत,तदैव सः निरणैषीत् यदसौ अमदाबादे तस्य स्मारकं विनिर्मास्यति। सरदारवल्लभभाई-पटेलः अमदावा- दनगर-पालिकायाः Mayor-इति महापौरत्वेन निर्वाचितः,तदनु सत्वरमेव असौ लोकमान्यतिलकस्य स्मारकस्य कृते Victoria Garden-इति स्थलम् अचिनोत्,Victoria Garden-इत्युद्यान-स्थलं ब्रिटेन-साम्राज्ञ्याःनाम्ना आसीत्। स्वाभाविकरूपेणब्रिटेन-शासनम् अप्रसन्नमासीत्। कर-समाहर्ताएतदर्थम् अनुमति-प्रदानं सततं न्यषेधीत् परञ्च सरदार-महोदयस्तु सरदार-महोदयः असीत्। असौ दृढ- निश्चयः आसीत,अवोचच्च - 'वरं हि पदत्यागः,परञ्च लोकमान्यतिलक-वर्यस्य प्रतिमा नूनं प्रतिष्ठापयिष्यते एव। अन्ततः प्रतिमा एषा विगते शताब्दे ऊनत्रिंशत्तमे वर्षे फेब्रुआरि-मासे अष्टाविंशे दिने, नान्यस्य अपरस्य कस्यचित्, अपि तु महात्मनः गान्धि-महोदयस्य करकमलाभ्यामेव प्रतिष्ठापिता। अतितराम् आनन्दस्य विषयोह्ययं यत् तस्मिन् प्रतिमानावरण-समारोहस्य अभिभाषणे पूज्यः बापूः अब्रवीत् यत् सरदारपटेलस्य महापौरत्वेन आगमनान्तरम्अमदाबादनगर-पालिका न केवलमेकं जनम् अवाप्नोत् अपि तु, अनया साहसमपि अधिगतम्, एतस्मादेव तिलक-महोदयस्य प्रतिमा-निर्माणम् शक्यमजायत।

मम प्रियाः देशवासिनः, अस्याः प्रतिमायाः एषा विशिष्टता यत् प्रतिमायाः अधस्तात्लिखितमस्ति 'स्वराज्यम् अस्मदीयो जन्मसिद्धोह्यधिकारः' तथा च आङ्गल-शासकानां तस्य कालखंडस्य कथामिमां तु श्रावयामि। लोकमान्य-तिलक-मदोदयस्य प्रयासैरेव सार्वजनिकी गणेशोत्सवस्य परम्परा आरब्धा। सार्वजनिकी गणेशोत्सवस्य परम्परा एषा, श्रद्धोत्सवाभ्यां साकमेव समाज-जागरणस्य, सामूहिकतायाः,जनेषु च समरसतायाः समानतायाश्च भावान्प्रवर्धयितुं प्रभावि-माध्यमत्वेन प्रावर्त्तत। एते उत्सवाः जाति-सम्प्रदाययोः बाधाः निरस्य सर्वान्नपि समन्वेतुं सहायिनः सिद्धाः। गच्छता कालेन, आयोजनानामेतेषां लोकप्रियता समेधिता। अनेन एव ज्ञायते यत् अस्माकं प्राचीन-रिक्थस्य इतिहासस्य च वीर-नायकान् प्रति अद्यत्वेह्यपि अस्मदीया युव-संततिः कियन्तम् उन्मादि-भावं धारयति इति। साम्प्रतमपि अनेकेषु नगरेषु प्रतिवीथी भवन्तः गणेश-मण्डपान् अवलोकयितुं शक्नुवन्ति। वीथ्याः सर्वेह्यपि कुटुम्बाः सम्भूय एनमायोजयन्ति। वृन्द-रूपेण कार्याणि आचरन्ति, एवं हि अस्मदीयाः युवानोह्यपि अत्र नेतृत्व-प्रबन्धन-समायोजनादि-गुणान् विकासयितुं समुचितावसरम् अवाप्नुवन्ति।

मम प्रियाः देशवासिनः ! विगते कालेह्यपि साग्रहं निवेदितवान्, साम्प्रतं यदाहं लोकमान्य-तिलक-महोदयं स्मरन्नस्मि तदा पुनरेकवारं साग्रहं कथयामि यत् ऐषमः क्रमेह्यपि वयं सोत्साहं सश्रद्धं सर्वात्मना च गणेशोत्सवमायोजयामः, परन्तु eco-friendly-इति पर्यावरणानुकूलंगणेशोत्सवमेव आयोजयेम इत्याग्रहं च धारयेम। अभिलषामि यत् भगवतः गणेशस्य मूर्तेः सर्वाण्यपि सज्जोपकरणानि पर्यावरणानुकूलानि स्युः, इदमपि अभिलषामि यत् प्रत्येकमपि पुरे पर्यावरणा- नुकूलस्य गणेशोत्सवस्य पृथक्-पृथक् स्पर्धाः स्युः,विजेतृभ्यः पुरस्काराः प्रदेयाः, तथा च इदमपि अभिलषामि यत्MyGov-NarendraModiApp-चेत्यत्रापि eco-friendly -इति पर्यावरणानुकूलस्य गणेशोत्सवस्य वस्तूनां व्यापकः प्रचारः स्यात्। अहमवश्यं भवतां भावान् विचारान् च जनेभ्यो ज्ञापयिष्यामि। लोकमान्य-तिलक-वर्यः देशवासिषु आत्मविश्वासं वर्धितवान्, सःसमाघोषम् प्रादात्- 'स्वराज्यम् अस्मदीयो जन्मसिद्धः अधिकारः नूनमेनम् अवाप्स्यामः'। अद्यत्वे एतत्-कथनस्य समुचितः कालः यत् 'स्वराज्यम् अस्मदीयो जन्मसिद्धः अधिकारः नूनमेनम् अवाप्स्यामः'। प्रत्येकमपि भारतीयस्य कृते सुशासन-विकासयोः भद्रतर-परिणामाः सुगम्याः भवेयुः। इदमेव तथ्यं,यद्धि नूतन-भारतं निर्मास्यति। तिलक-महोदयस्य जन्मनः पञ्चाशद्वर्षा -णामनन्तरम् सुतरां तस्मिन्नेव दिने अर्थात्जुलाई-मासे त्रयोविंशे दिने भारत-मतुः प्रिय-सुपुत्रस्य जन्म अभवत्,येन देशवासिनां स्वातन्त्र्यार्थम् स्वीयं जीवनं समर्पितम्। अहं चन्द्रशेखर-आजादस्य पुण्य-स्मरणम् करोमि। भारते को नामनवयुवा भवेत् यो हि एताः पङ्क्तीः श्रुत्वा प्रेरितो न स्यात्-

'सरफरोशी की तमन्ना अब हमारे दिल में है,
देखना है जोर कितना बाजु-ए-कातिल में है'

एताः पङ्क्तयः अशफाक-उल्लाह-खान-भगत-सिंह-चन्द्रशेखर-आजाद-सदृशान् अनेकान् नवयुवकान् प्रेरितवत्यः। चन्द्रशेखर-आजादस्य शौर्यम्,स्वतन्त्रतायाः कृते तस्योन्माद-भावश्च,असंख्य-युवजनान् प्रेरितवन्तौ। आजादःनिजजीवनं पणीकृत्य न कदाचिदपि वैदेशिकशासनस्य सम्मुखं अवानमत्। ममेदं सौभाग्यमासीत्यत् मध्यप्रदेशे चन्द्रशेखर-आजादस्य ग्रामेअलीराजपुरे गमनस्य सौभाग्यमपि अवाप्नवम्। इलाहाबादस्य चन्द्रशेखर-आजादपार्क-इत्यत्रापि श्रद्धासुमनांसि अर्पयितुम् अवसरं लब्धवान्। चन्द्रशेखर-आजाद-वर्यः तादृशो वीरपुरुषः आसीत् यो हि वैदेशिकानां गोलिकाभिः मर्तुमपि नैव समैहत -जीवनमपि स्वाधीनतया मरणस्य वरणमपि स्वेच्छया। इयमेवासीत् तस्य विशेषता। पुनरेकवारं अनयोः चरणकमलयोः श्रद्धापूर्वकं प्रणमामि।

नातिचिरं Finland-देशे आयोजितासु कनिष्ठ-विंशत्यून-विश्व-धावन-स्पर्धासु चतुश्शत-मीटर-मितायां धावन-स्पर्धायां,भारतस्यवीराङ्गना कृषक-पुत्री हिमादासः सुवर्ण-पदकं विजित्य इतिहासं व्यरचत्। देशस्य एका अपरा पुत्री एकता-भयानः मम पत्रस्य उत्तररूपेण इंडोनेशिया-देशात् मह्यम् ईमेल-इति विद्युत्-पत्रम् प्रेषितवती। साम्प्रतं सा Asian-Games-इत्येतदर्थम् सज्जते। E-mail-पत्रे एकता लिखति- 'कस्यापि धावकस्य जीवने सर्वाधिकं महत्वपूर्ण-क्षणम् तद् भवतियदा असौ त्रिवार्णिकम् ध्वजं धृत्वा सहभागितामावहति, तथा चाहं गौरवमनुभवामि यत्मया तदनुष्ठितमेव।'

एकते ! वयं सर्वेह्यपि त्वयि गौरवमनुभवामः। त्वया देशस्य कीर्तिः विवर्धिता। Tunisia-देशे विश्व-पैराएथलेटिक्स-Grand Prix-अष्टादशोत्तर-द्वि-सहस्र-वर्षीय-स्पर्धासु एकतासुवर्णं कास्यं च पदके विजितवती। तस्याःइयम् उपलब्धिः विशिष्टा यतो हि सा पञ्चदश-वर्ष-पूर्वं मार्गीय-दुर्घटनायां आहता, तस्याः शरीरस्य अर्धभागः निष्क्रियः जातः,परञ्च एषा दुहिता धैर्यं नैवात्यजत्, आत्मानं सबलीकृत्य उपलब्धिरियमधिगता। अपरः दिव्याङ्गः योगेश- कठुनिया,असौ Berlin-नगरे पैरा-एथलेटिक्स-Grand Prix-स्पर्धासु discus throw-इति चक्रक्षेप-स्पर्धायां सुवर्ण-पदकं विजित्य विश्व-कीर्तिमानं व्यरचयत,तेन साकं सुन्दरसिंह-गुर्जरः अपि javelin-इति प्रास-क्षेप-स्पर्धायां सुवर्ण-पदकं जितवान्। अहं एकता-भयान-योगेश-कठुनिया-सुन्दरसिंह-वर्याणाम् सर्वेषामपि साहसं सङ्कल्पं दृढ-निश्चयञ्च अभिनन्दामि वर्धापयामि च। भवन्तः सर्वे इतः परमपि अग्रेसरन्तु,अनारतं क्रीडन्तु,विकसन्तु च।

मम प्रियाः देशवासिनः, ऑगस्ट-मासः इतिहासस्य अनेकाभिः घटनाभिः, उत्सवैश्च नितरां सम्भरितोह्यस्ति,परञ्च ऋतोः प्रभावात् कदाचित् रुग्णतापि गृहं प्रविशति। अहं भवतां सर्वेषाम् उत्तम-स्वास्थ्यस्य कृते, देशभक्तेः प्रेरणादायिनःअस्य ऑगस्ट-मासस्य कृते, युग-युग-प्राचीनेभ्यः अनेकानेकेभ्यः उत्सवेभ्यश्च,भूरिशो शुभकामनाः व्याहरामि। पुनरेकवारं 'मन की बात'-प्रसारण-व्याजेन अवश्यं मेलिष्यामः। कोटिशो धन्यवादाः।

## लेखकानां कृते निवेदनम्

समोदं संसूचयामो यत् दिल्लीतः प्रकाश्यमाना संस्कृत-संवादनाम्नी पाक्षिकी पत्रिका भवतां समेषां संस्कृतानुरागिणां सृजनात्मकलेखान् गद्यत्वेन पद्यत्वेन वा आमन्त्रयति। तत्र भवल्लेखभाषा सुसंस्कृत परिष्कृत सरसा स्वकल्पिता औचित्यपूर्ण कल्याणवाहा आधुनिकभावभरिता समाजिकचैतन्यसम्भृता च स्यात्। आशास्महे भवन्तः निजपरितः जायमानानां नवीनानां घटनानां कार्यक्रमाणां च समाचारमत्र sanskritsamvad@gmail.com, सम्प्रेष्य संस्कृतसंस्कृत्योः प्रचाराय नैजं योगदानं प्रदास्यन्ति।

- संवादाय यान् लेखान् प्रेषयेयुः ते कागदस्य एकस्मिन् एव पार्श्वे लिखेयुः। पङ्क्तीनां मध्ये पर्याप्ततया अवकाशो भवेत्।
- लेखाः स्फुटैः अक्षरैः संयोजनं कारयित्वा प्रेषयन्ति तर्हि उत्तमस्।
- लेखस्य मूलं प्रति प्रेषयेयुः हस्तलिखितछायाप्रतिलेखाः न स्वीक्रिन्ते।
- लेखेषु, गीतेषु वा कुत्रापि राष्ट्रविरोधः व्यक्तिविरोधश्च न स्यात्।
- लेखस्य आदौ अन्ते वा लेखकस्य नाम अवश्यम् उल्लिखितं स्यात्।
- प्रसंगविशेषनिमित्तीकृत्य रचितः लेखः मासात् पूर्वम् एव प्रेषणीयः।
- कथाम् लेखञ्च येऽनुवादं कृत्वा प्रेषयितुम इच्छेयुः ते मूललेखकस्य अनुमतिपत्रं प्राप्य एव प्रेषयेयुः।
- ई-मेल् माध्यमेन अपि लेखादिकं प्रेषयितुं शक्यम्। तदा तु वाक्मैन-चाणक्यफोण्टद्वारा पेजमेकर इत्यस्मिन् देवनागरीलिप्यां मुद्रितैव सामग्री प्रकाशनाय सौकर्यं भवति।
- लेखाः पी.डी.एफ स्वरूपेऽपि स्वीक्रियते।
- संस्कृतजगद्वार्तासु केवलं संस्कृतभाषायामेव प्रेषणीयः।

Girish Kumar Bansal,Manager
Vidya Deep
Public School
(Govt. Recognised)
C-400/A, Main Market
Bhajan Pura, Delhi-110053
Mob.: +91-9555955591
+91-9810067099,+011-22563764

**पाठकानां कृते सूचनाः-**

कृपया संस्कृत-संवादः पाक्षिकवार्तापत्रस्य ग्राहकत्वं स्वीकर्तुं पञ्चवार्षिकशुल्कं रु ६००/- ( संस्थादीनां कृते ) द्विवार्षिकशुल्क रु. २४०/- ( व्यक्तीनां कृते ) मनिऑर्डरः, चैकः ड्राफ्टः, इत्यनेन 'संस्कृत-संवाद' इतिनाम्नः सम्पादकीयकार्यालये प्रेषयेयुः। अथवा अस्यां वित्तकोषसंख्यायां ( A/C) शुल्कराशिः प्रेषयितुं शक्यते। वित्तकोषविवरणम्-
Sanskrit samvad,
Current A/C No. 224902000000142,
Indian Overseas Bank, Yamuna Vihar,
Delhi-110053
IFC Code- IOBA0002249



प्रथमपुटस्य शेषभागः

# नृत्यमहोत्सवे संस्कृतगीताश्रिता नृत्यप्रस्तुतिः.....

एतदतिरिक्तं कैरोलिनाप्रादामहोदयया प्रणीतं निर्दिष्टं च 'डोराडो' इत्याख्यं कथानकं मयूरभञ्जछऊनृत्यशैल्याम् अजितेश गोगना-महक चावला-निशारॉय-कणिका राजपूत-नटलेसालाजार-नामभिः कलाकारैः प्रस्तुतम्। जयशंकरप्रसाद विरचितं 'बीती विभावरी जाग री' - इत्येतद् हिन्दीगीतं दिव्यागोस्वामीदीक्षितया कथकनृत्यशैल्यां प्रस्तुतम्। शिबदासबनर्जीकृतं 'गंगा आमार मा' इत्येतद्बंगभाषा-गीतं तान्या-सक्सेना भरतनाट्यशैल्यां प्रास्तौत्। एवमेव पूर्वाधनाश्री डाक्टर देवुलपल्ली-वेंकटकृष्णशास्त्रि-ग्रथितं 'पुव्वुल पाट' शीर्षकं तेलुगुगीतं विलासिनीनाट्यशैल्यां प्रस्तुतवती। डाक्टर श्रीधरवासुदेवन् श्रीरविसुब्रमणियन्-निर्मितं तमिलभाषानिबद्धं 'लयित्तवन कदै' इतिशीर्षकं काव्यं भरतनाट्यशैल्यां प्रास्तौत्।

नृत्यसमारोहे संगीतकारा इमे आसन्- अदिति शर्मा, शंचारी भट्टाचार्जी, के.वेंकटेश्वरन(गायकाः)। जाकिरहुसैन वारसी(तबलावादकः), मनोहर बालचंद्रन(मृदंगवादकः), रजत प्रसन्नः(वेणुवादकः), जी.राघवेंद्रप्रसादः(वायलिनवादकः)। नट्वांगम्- सुब्बुलक्ष्मी गणेश। 'क्रूरहृदय मेघ...' इत्यस्य नृत्यस्य संगीतसज्जा डॉक्टर श्रीधर वासुदेवन-महोदयेन कृता।

सी.डी.देशमुख-प्रेक्षागारे समायोजिते दिवसत्रयव्यापिनि 'लुकिंग बैक टू मूव फार्वर्ड' इतिशीर्षकांकिते नृत्यमहोत्सवेऽस्मिन् 'ओडिसी' प्रभृतीनि नृत्यान्यपि प्रास्तूयन्त।

स्मरणीयं विद्यते यत् 'संस्कृतसंवाद' पत्रस्य विगतेंके डॉक्टर रमाकान्तशुक्लेन प्रणीता 'क्रूरहृदय मेघ!' इतीयं रचना अविकलरूपेण समुद्धृतासीद् यांशतो नृत्याधारगीतरूपेणांगीकृताभवत्। अस्या गानं श्री के. वेंकटेश्वरन-महाभागेन कृतम्।



प्रथमपुटस्य शेषभागः

# हैदराबाद्-नगरे 'द्वि-दिवसीय-संस्कृत-कार्यशाला' सुसम्पन्ना

भक्तिपद्यानां शिशुगीतानां सामान्यगीतानां च गायनं सम्भाषणसंस्कृतम् अपि संस्कृतेन विशेषरूपेण पाठितम्। बेङ्गलूरु नगरस्य संस्कृत-स्वयंसेवकः श्रीमान् जी.बी. शक्तिवर्यः सम्भाषणसंस्कृत-वर्गाणां सञ्चालने सक्रिय-समर्थनं दत्तवान्।

अस्याः संस्कृत-कार्यशालायाः आरम्भः 2018-जुलै-मासस्य एकविंशतितम-दिनाङ्के प्रातः दशवादने त्रिवारम् 'ओम्' इति मन्त्रोच्चारणेन अभवत्। अन्ते निमेषं यावत् मौनमपि अनुष्ठितम्।

'श्री-अरविन्द-सोसाइटी' इति संस्थायाः हैदराबाद-शाखायाः अध्यक्षः श्रीमान् प्रेम् चन्दउद्घाटन-समारोहस्य अध्यक्षः अभवत् संस्कृतभाषाध्यनावश्यकता-विषये स्ववक्तव्यं च दत्तवान्। उक्त संस्थायाः सचिवः श्रीमान् मुलुगु श्रीनिवास- वर्यः विभिन्न-प्रदेशेभ्यः मातृभाषाभ्यः आयुर्वर्गेभ्यः च आगतानां प्रतिभागिनां स्वागतं कृतवान्। तत्परं 'साफिक्, पुदुच्चेरी' इति संस्थायाः संक्षिप्त-परिचयमपि दत्तवान्।

एतस्याः कार्यशालायाः समारोप-समारोहः 2018-जुलै-मासस्य द्वाविंशतितम-दिनाङ्के सायङ्काले पञ्चवादनतः सम्पन्नः। एतस्मिन् अवसरे हैदराबाद् नगरस्य 'वेद-संस्कृति-समितिः' इति संस्थायाः अध्यक्षः श्रीमान् ए.हेच्. प्रभाकर राव् समारोहस्य मुख्य-अतिथिः अभवत्।

समारोहस्यारम्भः वेद-पण्डितद्वयस्य वेदपठनेन प्रतिभागिनां प्रार्थनया च अभवत्।

श्रीमान् ए.हेच्. प्रभाकर राव् देवभाषा-संस्कृतस्य मूलस्य महत्त्वं संक्षिप्त-विवरणं च दत्तवान्। तदनन्तरं देशजनानां सर्वेषां संस्कृतभाषाध्ययनस्यावश्यकतायाः समर्थनं कृतवान् संस्कृतभाषायां अन्य विज्ञानानि मध्ये उपस्थित-सम्बन्ध-विषये सविवरणं उक्तवान् 'संस्कृतभाषा निकट-भविष्ये एव अस्माकं भारतवर्षस्य 'राष्ट्रभाषा' भविष्यति' इति भविष्यवाणीं अपि च उद्घोषितवान्।

तदनन्तरं मुख्य-अतिथिः प्रतिभागेभ्यः प्रमाणपत्र-वितरणम् अकरोत्। तत्पूर्वं प्रतिभागिनः कार्यशालावसरे प्राप्तान् स्वानुभवान् प्रकटितवन्तः, सन्तृप्तिं सन्तोषञ्च सूचितवन्तः। कार्यशाला-सञ्चालकः डॉ. वाई.एन्. राव-वर्यः 'धन्यवाद-समर्पणं' कृतवान्।

इयं संस्कृत-कार्यशाला त्रिवारम् 'ओम्' इति मन्त्रोच्चारणेन समाप्ता अभवत। अन्ते निमेषं यावत् मौनमपि अनुष्ठितम्।



अस्माकं प्रेरणास्त्रोतः- स्व.पं० रामकिशोरशर्मा,
परामर्शकाः-डॉ.रमाकान्तशुक्लः, डॉ.रवीन्द्रनागरः, डॉ.धर्मेन्द्रकुमारः, डॉ.बलदेवानन्दसागरः, आचार्यपंकजः, डॉ. अरविन्दतिवारीः
सम्पादिका-मञ्जूशर्मा, उपसम्पादकः- डॉ. सन्नीकुमार, संदीप कुमार उपाध्याय, राजेशझाः, प्रबन्धसम्पादकौ- वेदप्रकाशशर्मा, नेहाशर्मा च,

स्वत्वाधिकारिण्या, मुद्रिकया, प्रकाशिकया सम्पादिकया च मञ्जूशर्ममहोदयया राहुल-ऑफसेट-प्रिंटर्स, 521/8 कृष्णागली सं. 14, मौजपुरनगरम्, देहली-53तः मुद्रापयित्वा ए-2/32, वजीराबादमार्गः भजनपुरा, देहली-53 इत्यतः प्रकाशितम्।
दूरभाष : 09311086751 ई-मेलः sanskritsamvad@gmail.com, RNI No. : DELSAN/2011/38660 DL(E)-21/5379/2014-16 राष्ट्रियसंस्कृतसंस्थानस्य अनुदानेन प्रकाश्यमानं पत्रमिदम्।